अधीत् भगवान् ब्रह्मणा स:
स्वायम्भुव मनु: यो ब्रह्मणा
मानस: पुत्र: आसीत् तथैव
स: काव्य पुरुषाय अपि
नाह्य काव्यस्य ज्ञानं प्रदत्तम्।

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: [ ] અ [ ] + બ [ ] + ક [ ] + ડ [ ] = કુલ [ ]

(2) इह हि वाङ्मयमुभयथा शास्त्रं काव्यं च ।
शास्त्रापूर्वकत्वात् काव्यानां पूर्वं
शास्त्रेष्वभिनिविशेत ।

→ अन्वयः :- इह वाङ्मय उभयथा
शास्त्रं काव्यं च । शास्त्रा पूर्वकत्वात्
काव्याना पूर्वं शास्त्रेषु अभिनिविशेत ।
न ह्य प्रवर्तित पदीप आस्ते तत्वार्थ
सार्थमध्यक्षयन्ति ।

अर्थ :- अत्रा वाङ्मयस्य द्वौ
प्रकाराः प्रतिपादिता चेत -
(1) शास्त्रा
(2) काव्य

शास्त्रा - स्य व्याख्या पूर्वं
काव्यानां एवं पूर्वं शास्त्रस्य
वर्णनम् करिष्यामि । तत्रा
प्रवर्तित प्रतिपाद्य तत्वार्थ एवं
सार्थ मध्यक्षयन्ति । अत्रा शास्त्रा
एवं काव्यस्य प्रकाराः
प्रतिपादिता

# શ્રીસોમનાથસંસ્કૃતયુનિવર્સિટી, વેરાવલમ્

15/10/2019
SHASTRI SEM-5/Regular
Navy Vyakran / Paper -6

Sea [redacted]
Cer [redacted]

202

| | |
|---|---|
| કોર્ષનું નામ :- | શાસ્ત્રી તૃતીય: T. Y. B. A. |
| રેગ્યુલર / રીપીટર / બાહ્ય : | રેગ્યુલર |
| સેમેસ્ટર / વાર્ષિક : | સેમ- 5 |
| માસ અને વર્ષ : | ઓક્ટોમ્બર- 2019 |
| પેપર નં.: | 6 - C.C.3.S.70. |
| વિષયનું નામ : | नव्यव्याकरणम् - 2. |
| તારીખ : | 15 - 10 - 2019 |
| સમય : | 3:00 to 6:00 |

| મુખ્ય ઉત્તરવહી | પુરવણી | કુલ |
|---|---|---|
| ૧ | 0 | ૧ |

**:: ગેરરીતિના (Copy Case) કિસ્સામાં ::**

સિનિયર સુપરવાઈઝરની સહી ..............................

તારીખ : ..............................

**મૂલ્યાંકન**

| પ્રશ્ન નં. | કુલ ગુણ | મેળવેલ ગુણ | મોડરેટર દ્વારા અપાયેલ ગુણ | પુનઃ મુલ્યાંકન |
|---|---|---|---|---|
| ૧ | 10 | 07 | | |
| ૨ | 10 | 08 | | |
| ૩ | 10 | 07 | | |
| ૪ | 10 | 07 | | |
| ૫ | 10 | 06 | | |
| ૬ | 10 | 06 | | |
| ૭ | 10 | 07 | | |
| ૮ | | | | |
| ૯ | | | | |
| ૧૦ | | | | |
| ૧૧ | | | | |
| ૧૨ | | | | |
| કુલ સરવાળો | 70 | 55 | | |

મેળવેલ ગુણ શબ્દોમાં : પંચાવન

મૂલ્યાંકન કરનારનું નામ ચિંતનકુમાર દવે

મૂલ્યાંકન કરનારની સહી [signature]

મોડરેટરનું નામ : [illegible]

મોડરેટરની સહી : [illegible]

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

| પ્રશ્ન નં.: | 1 | અ | 4 | + બ | | + ક | | + ડ | | = કુલ | |
|---|---|---|---|---|---|---|---|---|---|---|---|

unit - I

गुणाः

१०

॥ प्रथमाह्निकः ॥

॥ प्रश्न. १ ॥

* निम्नलिखितेषु द्वयोः सोदाहरणं व्याख्या कार्या ।

१ अकारस्य विवृतोपदेशेन किं प्रयोजनमिति भाष्योक्तदिशा व्याख्येयम् ।

⇒ अकारस्य विवृतोपदेशः कर्तव्यः। तेन किं प्रयोजनम् ?

आकार ग्रहणार्थम् अकारः सवर्ण ग्रहणेन आकारमपि यथा गृह्णीयात् । किं च कारणेन गृह्णीयात् । विवार भेदात् ।

ननूच्यते विवार भेदादिति न पुनः काल भेदात् कालग्रहणम् न पुनः कालभेदात् अपि । कथं च सविवाराधिनः एवं काल भिन्नोऽपि सत्यमेव तत् वक्ष्योऽपि तेन तत् वक्ष्यति तुल्यास्य प्रयत्नं सवर्णम् इत्यत्र स्थानैक्य वक्ष्य प्रयोजनात् विवार भेदात् वक्ष्य प्रयोजनम् आस्ये येषां तु तुल्यास्यप्रयत्नौ तौ सवर्णसंज्ञा तेन

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: [ ] અ [–] + બ [3] + ક [ ] + ડ [ ] = કુલ [ ]

अथवानीति ।

बाह्यश्च पुनराख्यात्काल: । तेन
ख्यातेप कालभिन्नस्य ग्रहणम् न पुन
विचार भिन्नस्य किं पुनरिदं विवृतस्योपदिश्य
मानस्य प्रयोजनमन्वाख्यायते ।

आहोस्वित् विवृतोपदेशो
धते । अ अ इति इत्यकारस्य विवृत
स्य संवृतार प्रत्यापत्ति स्यात् भवानाह
एवं तु शूभो विवृतस्योपदिश्य मानस्य
प्रयोजनमन्वाख्यायते इति अकारस्य विवृतो
पदेशेन प्रयोजनम् भाष्योक्तादिशा वाते ।

(2) तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्
भाष्योक्तदिशा व्याख्येयम् ।

=) तस्यतस्याक्षरसमाम्ना ।
यिकस्य विवृतोपदेश अन्यत्रापि विवृतोपदेश:
कार्य: । क्वचित्यत्र धातु प्रातिपदिक
प्रत्यय निपातस्थस्या । किं प्रयोजनम् ।

सवर्णग्रहणार्थ: । आक्षर
समाम्नायिकेनास्य ग्रहणं यथा स्यात्
किं च कारणं न स्यात् । विचार

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: [ ] અ [ ] + બ [ ] + ક [ ] + ડ [ ] = કુલ [ ]

भेदादेव । आचार्यप्रवृत्ति ज्ञापयति भवत्या
क्षरक्षमात्रनाचिकेन सवर्णग्रहणमनण्त्वात्
ग्रहणमिति । अकः सवर्णे दीर्घः ग्रहणं
करोति । कथं कृत्वा ज्ञापकम् । नहि
प्रयोगः क्षर नौनपदिना ज्ञापकम् । तस्मात्
वकारार्थं धात्वादि स्थश्च विधृत इति दीर्घ
निवृत्त्यर्थं सवर्णग्रहणमनण्त्वात् नानुवृत्ति
निर्देशे सवर्णानां ग्रहणं न प्राप्नोति
उरस्यत्वौ पश्यति च । किं कारणम्
अनण्त्वात् न प्रोतोऽणः येऽनुवृत्तौ । यो
नहि येऽक्षर समाम्नाय उपदिश्यन्ते तत्रा
नुवृत्तिनिर्देशे सवर्णग्रहणमनण्त्वात् इति
भावार्थं व्याख्या सोदाहरणा सहिता स्पष्ट
मेव । इति ।

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

श्री-सोमनाथ-संस्कृत-युनिवर्सिटी सोमनाथ-वेरावल
॥ पूर्णता गौरवाय ॥

16/10/2019
SHASTRI SEM-5/Regular
Puranetihas / Paper -7

35

| | |
|---|---|
| કોર્ષનું નામ :- | શાસ્ત્રી 3 |
| રેગ્યુલર / ~~રીપીટર~~ / ~~બાહ્ય~~ : | રેગ્યુલર |
| સેમેસ્ટર / ~~વાર્ષિક~~ : | SA 5 |
| માસ અને વર્ષ : | ઑક્ટોબર - 19 |
| પેપર નં.: | 7 |
| વિષયનું નામ : | पुराणेतिहासः |
| તારીખ : | 16/10/19 |
| સમય : | 3 to 6 PM |

| મુખ્ય ઉત્તરવહી | પુરવણી | કુલ |
|---|---|---|
| ૧ | | |

:: ગેરરીતિના (Copy Case) કિસ્સામાં ::

સિનિયર સુપરવાઈઝરની સહી ..............................

તારીખ : ..................................................

**મૂલ્યાંકન**

| પ્રશ્ન નં. | કુલ ગુણ | મેળવેલ ગુણ | મોડરેટર દ્વારા અપાયેલ ગુણ | પુનઃ મુલ્યાંકન |
|---|---|---|---|---|
| ૧ | 10 | 08 | | |
| ૨ | 10 | 08 | | |
| ૩ | 10 | 08 | | |
| ૪ | 10 | 07 | | |
| ૫ | 10 | 07 | | |
| ૬ | 10 | 06 | | |
| ૭ | 10 | 07 | | |
| ૮ | | | | |
| ૯ | | | | |
| ૧૦ | | | | |
| ૧૧ | | | | |
| ૧૨ | | | | |
| કુલ સરવાળો | 70 | 51 | | |

મેળવેલ ગુણ શબ્દોમાં : એકાવન

મૂલ્યાંકન કરનારનું નામ ....[illegible].... મૂલ્યાંકન કરનારની સહી P.S.R

મોડરેટરનું નામ : .................................... મોડરેટરની સહી : [illegible]

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: 1 અ 4 + બ 4 + ક + ડ = કુલ 8

[प्रपमान्विति:]

[प्रश्न - 1]

1) तस्माद्भारत ! सर्वात्मा भगवानीश्वरो हरिः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम् ॥

→ श्लोकोऽयं श्रीमद्भागवतमहापुराणे द्वितीये स्कन्धे तृतीये अध्याये श्रीशुकस्य मुखात् निःसृतः वर्तते । अयं च श्लोकः परीक्षितं प्रति कथितः वर्तते इति सन्दर्भणीयम् ।

→ प्रसङ्गः :-

→ यदा भगवतः श्रीनारायणस्य विराजः स्वरूपस्य वर्णनं भगवता श्रीशुकेन विहितं तदानीं भगवतः माहात्म्य अपि तैस्तत्र निदर्शितम् ।

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: [ ] અ [ ] + બ [ ] + ક [ ] + ડ [ ] = કુલ [ ]

→ अत्र च माहात्म्ये भगवतः माहात्म्यं दर्शयन्नेव अयं श्लोकः उक्तः वर्तते । अत्र च श्लोके अभयमिच्छता मनुष्येण किं कर्तव्यमिति दर्शितम् अस्ति ।

* भावार्थः :-

→ अत एव हे परीक्षित ! सर्वव्यापी भगवान्नेव हरिः वर्तते । यदि भवता सर्वतः अभयमिच्छते तर्हि तस्य एव स्मरणं कर्तव्यम् । तस्य एव कीर्ति कीर्तनं कर्तव्यम् । तस्य एव श्रवणमपि कर्तव्यम् ।

* व्याख्या :-

→ अत्र श्रीशुकः परीक्षितं कथयति यथा च - हे परीक्षित ! भगवान् हरिः सर्वात्मा वर्तते ।

→ भगवान् अर्थात् भग ऐश्वर्ये । यः सर्वैश्वर्यशाली वर्तते सः भवति भगवान् ।

यथा च -

(ફક્ત મુલ્યાંકનકારશ્રીના ઉપયોગ માટે)

પ્રશ્ન નં.: [ ] અ [ ] + બ [ ] + ક [ ] + ડ [ ] = કુલ [ ]

ऐश्वर्यस्य समग्रस्य
धर्मस्य यशसः श्रियः ।
ज्ञानस्य च विरागस्य
षण्णां भग इतीरणा ॥

अत्र षड्विधैश्वर्यवान्नेव भगवान् भवति । तादृशः हरिः सर्वात्मा वर्तते । अर्थात् यः सर्वेषु जीवेषु स्थितः । यथा च -

यथा महान्ति भूतानि
भूतेषूच्चावचेषु च ।
प्रविष्टान्यप्रविष्टानि
तथा तेषु न तेष्वहम् ॥

ईदृशो हरिः येन अभयमिच्छते तेन श्रोतव्यः अर्थात् तस्य श्रवणं कर्तव्यम् । कीर्तितव्यः अर्थात् तस्य कीर्तनं कर्तव्यम् स्मर्तव्यः अर्थात् तस्य स्मरणं कर्तव्यम्

# श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल
## पीएच.डी. मूल्यांकन रीपोर्ट
## विद्यावारिधि के शोध प्रबन्ध की संस्तुति

---

(१) शोध छात्र का नाम :- Alok C Vaghela

(२) पंजीकरण क्रमांक :- 87 dt. 4/3/2011

(३) शोध विषय :- A Critical Study of Educational Thinking in Sanskrit Story Literature

(४) पत्र सन्दर्भ :- SSU/ph.D./1296/18/dt. 3/4/2018

(५) परीक्षक का नाम एवं वर्तमान पता :- DR. NARAYANAN E.R

(६) कार्यालय का पूरा पता :- ASSISTANT PROFESSOR (SR.) RSKS, K.J. SOMAIYA SKT. VIDYAPEETHA VIDYAVIHAR, MUMBAI-400077

कृपया शोध प्रबन्ध के विषय मे नियत स्थान पर टीकमार्क करते हुए अपनी विस्तृत रीपोर्ट प्रस्तुत करें।

(१) यह शोध प्रबन्ध वर्तमान स्वरूप में विद्यावारिधि पदवी के लिए स्वीकार किया जाता है। ( ✓ )

(२) ~~यह शोध प्रबन्ध विद्यावारिधि पदवी के लिए अस्वीकार किया जाता है। (कारण संलग्न करें )~~ ( — )

(३) ~~यह शोध प्रबन्ध पुनःसुधारकरे प्रस्तुत करने की संस्तुति की जाती है।~~ ( — )

(४) यह शोध प्रबन्ध प्रकाशत योग्य है ( ✓ ) ~~नहीं~~ ( — )
( स्पष्ट अभिप्राय )

Narayanan 07/05/2018
परीक्षक की सही

Dr. Narayanan E R
Assistant Professor
Rashtriya Sanskrit Sansthan
(Deemed University)
Vidyavihar, Mumbai - 400 077.

स्थान :- MUMBAI
दिनांक :- 07-05-2018

24/5
Pl. R.O.

## श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल
## परीक्षक की विस्तृत रीपोर्ट

---

शोधविषयः - संस्कृतकथासाहित्ये शैक्षिकचिन्तनस्य समीक्षात्मकमनुशीलनम् इति ॥

अनुसन्धाता - आलोकः सी. वाघेला ॥

अनुसन्धात्रा शिक्षार्थं प्रस्तूय तदुद्देशतद्विध्यावधारणादि यथाविधि निर्दिष्टम् । गुरुशिष्यसम्बन्धे हि श्रद्धावान् लभते ज्ञानमिति धिया तत्सम्बन्धप्राधान्यमप्यनुसन्धात्रा प्रबन्धेऽस्मिन् प्रस्तुतम् । शिक्षाया नैतिकत्वसामाजिकाध्यात्मिकत्वादिदृष्ट्या पर्यवेक्षणं प्रकरणेऽस्मिन् श्रेयसे कल्पितम् ॥

कर्मसङ्क्रमचङ्क्रमणबहुले जगति के वा कथाः शृण्वन्तीति प्रवादोऽत्रानुसन्धात्रा यथावस्तुकथाप्रस्तुति न्यक्कृत इत्यस्माकमयं रोचतेतमां नितरां प्रबन्धः ॥

गद्येन पद्येन वा कथानां प्रस्तुतौ रसानुगुणं शब्दार्थसम्बन्धस्थितौ तत्पर्यवेक्षणमपि ज्ञानानन्दवृद्धिप्रकल्पनं नाम । श्रुतश्च कादम्बरीरसज्ञायाहारोऽपि न रोचत इति । तत एवात्र कथामाहात्म्ये गुणाढ्यबृहत्कथातो हितोपदेशान्तं वा शैक्षिकं चिन्तनं समर्थयितुमालोकस्यास्यानुसन्धातुः प्रयत्नोऽत्र श्लाघ्यतेतराम् ॥

CONTD...

षट्सु ह्यध्यायेषु कृतं कार्यं ~~सप्तमे~~ सप्तमे संक्षिप्तं सम्बद्धमुपकल्पितम् ॥

तथाऽपि कादम्बर्याः शुकनासोपदेशादिभ्यः प्रतीतं किञ्चिद्विधातत्वमनुसन्धात्रा समीक्षितं स्याच्चेदितोऽप्युत्तमं प्रतिपद्येतेति प्रतिभातीव ॥

यागादिषु तस्यानुसन्धातुः श्रद्धा नो मोदास्पदा। हि सोमयागस्वरूपमनेन हिन्द्या क्वचिद्विरचय्य प्रकाशितमप्यवलोकितम् ॥

कदापि कथासाहित्यस्य ह्रासो न जायेतेति सर्वदैतादृशः प्रयत्नः प्रोत्साहनीयः। तदर्थं वेरावलस्य सोमनाथ संस्कृतविश्वविद्यापीठं हृदयेनाभिनन्दामि ॥

प्रस्तौमि चायं शोधप्रबन्धः पूर्णावलोकितप्राय इति क्वचित् कादम्बरीकथाध्ययप्रस्तुत्या प्रकाशनयोग्य इत्यलमलमतिप्रपञ्चितेन प्रलापेनेत्योम् ॥ तत् सत् ॥

स्थान :- MUMBAI

दिनांक :- 07-05-2018

Narayanan 07/05/2018

परीक्षक की सही

नाम :-

पता :-

Dr. Narayanan E R
Assistant Professor
Rashtriya Sanskrit Sansthan
(Deemed University)
Vidyavihar, Mumbai - 400 077.

# श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल
## पीएच.डी. मूल्यांकन रीपोर्ट
## विद्यावारिधि के शोध प्रबन्ध की संस्तुति

---

(१) शोध छात्र का नाम :- मनीष वी. राजपरा (राजपरा मनीष वल्लभभाई)

(२) पंजीकरण क्रमांक :- 123 दि. 6.11.15

(३) शोध विषय :- काण्वसंहितागतसंस्कारमन्त्राणां पारस्कर-गृह्यसूत्रभाष्यालोके आधुनिकदृष्ट्या

(४) पत्र सन्दर्भ :- परिशीलनम् ससयु/पीएच.डी./2496/20

(५) परीक्षक का नाम एवं वर्तमान पता :- श्रीकिशोर मिश्र, प्रोफेसर- संस्कृत,

(६) कार्यालय का पूरा पता . :- काशी हिन्दू विश्वविद्यालय वाराणसी - 221005 (उ०प्र०)

कृपया शोध प्रबन्ध के विषय मे नियत स्थान पर टीकमार्क करते हुए अपनी विस्तृत रीपोर्ट प्रस्तुत करें ।

(१) यह शोध प्रबन्ध वर्तमान स्वरूप में विद्यावारिधि पदवी के लिए स्वीकार किया जाता है । ( ✓ )

(२) यह शोध प्रबन्ध विद्यावारिधि पदवी के लिए अस्वीकार किया जाता है । (कारण संलग्न करें ) (   )

(३) यह शोध प्रबन्ध पुनः सुधारकर प्रस्तुत करने की संस्तुति की जाती है । (   )

(४) यह शोध प्रबन्ध प्रकाशत योग्य है ( ✓ ) नही ( x )
( स्पष्ट अभिप्राय )

श्री सोमनाथ संस्कृत युनिवर्सिटी
वेरावळ जि.गीर सोमनाथ
19 FEB 2020
आवक नं. 6166
18/II/20

परीक्षक की सही
(श्रीकिशोर मिश्र)

स्थान :- वाराणसी
दिनांक :- 9.2.2020

श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल
परीक्षक की विस्तृत रीपोर्ट

# शोधप्रबन्धप्रतिवेदनम्

श्रीसोमनाथस्य गुणालयस्थो मनीष-वी-राजपराभिधानः।
प्रास्तौत् सुशोधं प्रविधाय विद्यावारिध्युपाध्यर्थमिमं प्रबन्धम्।।१।।
काण्वानां संहितामन्त्राः संस्कारविधिमागताः।
पारस्करोक्तगृह्यस्य भाष्यकृद्विनियोगतः।।२।।
तदालोकमवाप्यात्र प्राचीनानुगतं भृशम्।
परिशीलनमस्त्यस्य दृष्टिराधुनिकी तथा।।३।।
शिक्षाङ्गगृह्यपरिशिष्टवितानयज्ञच्छन्दस्स्मृतिप्रभृतिशास्त्रततिप्रणेता ।
सत्प्रातिशाख्यमृगनुक्रमणीञ्च कृत्वा पारस्करो जयति कात्यगणे महर्षिः।।४।।
अध्याये प्रथमे गृह्यसूत्राणां परिचायनम्।
संस्काराणां द्वितीयेऽस्मिन् सम्यक् परिचयो धृतः।।५।।
तृतीये जन्मतः प्राग् ये संस्कारास्तेऽनुशीलिताः।
संस्काराःशैशवस्यात्र चतुर्थे प्रतिपादिताः।।६।।
ये शैक्षणिकसंस्कारास्ते विमृष्टाश्च पञ्चमे।
विवाहान्त्येष्टिसंस्कारावन्तिमे स्तो निरूपितौ ।।७।।
साधूपसंहारविधिर्यथान्ते ग्रन्थक्रमस्तत्परिशिष्टभागे।
बाह्यादिसौन्दर्यविधानपूर्णे ग्रन्थानुसन्धानपरे प्रबन्धे।।८।।
शोधप्रबन्धे सुनिवेदितेस्मिंष्टङ्कच्युतिर्नैव विचारणीया।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।९।।
निर्देशनार्थं रुचिरप्रबन्धस्यात्रैव योज्यो बहु साधुवादैः।
शत्रुघ्ननामा श्रुतिशास्त्रविज्ञः पाणिग्रही ग्रन्थविचारदक्षः।।१०।।
पूर्वोक्तहेतूनवधार्य सम्यक् परिश्रमं छात्रकृतं च दृष्ट्वा।
संस्तौम्यहं शोधकृतेऽत्र विद्यावारिध्युपाधिर्विधिना प्रदेयः।।११।।

माघपूर्णिमा २०७६ वि०

अधिकाशि

(श्रीकिशोरमिश्रः)

परीक्षकः

CONTD...

# शोधप्रबन्धप्रतिवेदनम्

श्रीसोमनाथस्य गुणालयस्थो मनीष-वी-राजपराभिधानः।
प्रास्तौत् सुशोधं प्रविधाय विद्यावारिध्युपाध्यर्थमिमं प्रबन्धम्।।१।।
काण्वानां संहितामन्त्राः संस्कारविधिमागताः।
पारस्करोक्तगृह्यस्य भाष्यकृद्विनियोगतः।।२।।
तदालोकमवाप्यात्र प्राचीनानुगतं भृशम्।
परिशीलनमस्त्यस्य दृष्टिराधुनिकी तथा।।३।।
शिक्षाङ्गगृह्यपरिशिष्टवितानयज्ञच्छन्दस्स्मृतिप्रभृतिशास्त्रततिप्रणेता ।
सत्प्रातिशाख्यमृगनुक्रमणीञ्च कृत्वा पारस्करो जयति कात्यगणे महर्षिः।।४।।
अध्याये प्रथमे गृह्यसूत्राणां परिचायनम्।
संस्काराणां द्वितीयेऽस्मिन् सम्यक् परिचयो धृतः।।५।।
तृतीये जन्मतः प्राग् ये संस्कारास्तेऽनुशीलिताः।
संस्काराःशैशवस्यात्र चतुर्थे प्रतिपादिताः।।६।।
ये शैक्षणिकसंस्कारास्ते विमृष्टाश्च पञ्चमे।
विवाहान्त्येष्टिसंस्कारावन्तिमे स्तो निरूपितौ ।।७।।
साधूपसंहारविधिर्यथान्ते ग्रन्थक्रमस्तत्परिशिष्टभागे।
बाह्यादिसौन्दर्यविधानपूर्णे ग्रन्थानुसन्धानपरे प्रबन्धे।।८।।
शोधप्रबन्धे सुनिवेदितेस्मिंष्टङ्कच्युतिर्नैव विचारणीया।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।९।।
निर्देशनार्थं रुचिरप्रबन्धस्यात्रैव योज्यो बहु साधुवादैः।
शत्रुघ्ननामा श्रुतिशास्त्रविज्ञः पाणिग्रही ग्रन्थविचारदक्षः।।१०।।
पूर्वोक्तहेतूनवधार्य सम्यक् परिश्रमं छात्रकृतं च दृष्ट्वा।
संस्तौम्यहं शोधकृतेऽत्र विद्यावारिध्युपाधिर्विधिना प्रदेयः।।११।।

माघपूर्णिमा २०७६ वि०

स्थान :- अधिकाशि

दिनांक :- 9.2.2020

( श्रीकिशोरमिश्रः)

परीक्षकः

परीक्षक की सही

नाम :- श्रीकिशोर मिश्र

पता :- प्रोफेसर - संस्कृत विभाग
काशी हिन्दू विश्वविद्यालय
वाराणसी - 221005

# * अनिवार्यसंस्कृतम् *

नाम :- देरासरी ऋषभः जे.

कक्षा :- आचार्य-२

विषयः :- अनिवार्य संस्कृतम्

"श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्.

भास्करस्वत्य नमः

* अनिवार्य संस्कृतम् *

श्रीगुरुभ्यो नमः

प्र=१ भारतीयवैज्ञानिकाः ।

(३) भास्कराचार्यः :-

संसारेऽस्मिन् आचार्यस्यास्य नाम सुप्रसिद्धं वर्तते। वराहमिहिरब्रह्मगुप्तयोः अनन्तरं प्रतिभाशाली सर्वगुणसम्पन्नः ज्योतिर्विद् भास्कराचार्यः नास्त्यन्यः। भास्कराचार्यस्य जन्म विद्याविनयसम्पन्ने ब्राह्मणकुले बभूव। महाराष्ट्रप्रान्तस्य सह्याद्रि समीपे स्थितस्य विज्जडविड्ग्रामे एतस्य आचार्यस्य जन्म बभूव। भास्कराचार्यः शाण्डिल्यगोत्रस्य ब्राह्मणकुले जनिमलभत। भास्कराचार्यस्य पितुः नाम महेश्वरः आसीत तथा च तस्य गुरुरपि आसीत्। केवलं ३६ वर्षस्य वयसि एव सिद्धान्तशिरोमणि सदृशस्य प्रौढग्रन्थस्य रचना अनेनाचार्येण कृता। तथा च ६९ वर्षस्य वयसि एव "करणकुतूहल" नामक ग्रन्थस्य रचना कृता। एतौ द्वावपि ग्रन्थौ ज्योतिषशास्त्रस्य मानक ग्रन्थौ स्तः। वर्तमाने समये सिद्धान्तशिरोमणिः केवलं गणिताध्याय रूपेण तथा च गोलाध्याय रूपेण प्रसिद्धः अस्ति।

आचार्य भास्करः स्वयञ्च तस्य ग्रन्थः लीलावती इत्येतयोः मध्ये अनेकाः दन्तकथाः प्रचलितास्सन्ति। केचन लीलावती भास्कराचार्यस्य पुत्री अस्ति इति मन्यते तथा च केचन पत्नी अस्तीति मन्यते परन्तु लीलावती भास्कराचार्यस्य पत्नी अस्ति इति इदमेव मतमुपयुज्यते यतो हि ग्रन्थेऽस्मिन् "बाले बाल-कुरङ्गलोलनयने लीलावति प्रोच्यताम्" इति पङ्क्तिः लिखितास्ति। अतः सा पत्नी आसीत न तु पुत्री इति।

भास्कराचार्यस्य पाटीगणितम्, बीजगणितम्, च अपूर्वं वर्तते। सिद्धान्तशिरोमणौ गणितं, प्रश्नोत्तरविधानम् अतीव गूढं वर्तते अद्य दिनं यावत गणितज्ञानां कृते ग्रन्थोऽयं विस्मयकारकोऽस्ति।

भास्कराचार्येण लिखितं बीजगणिते -
"ब्रह्माह्वय श्रीधरपद्मनाभ बीजानि यस्मादतिविस्तृतानि

अर्थात् ब्रह्मगुप्तश्रीधरपद्मनाभादीनां ग्रन्थेषु स्नारं संक्षृ बीजगणितं स्वीयं निर्मितम्। श्रीधरस्य "त्रिशतिका" प्रकाशित अस्ति। किन्तु पद्मनाभस्य बीजगणितमप्राप्यमस्ति। इत्यमस्माभिः ज्ञायते यत् भास्कराचार्येण पूर्वजानां प्रामाणिकग्रन्थानाम् आधारेण स्वकीयग्रन्थादीनां सिद्धान्त-शिरोमणिप्रभृतीनां रचना कृता वर्तते।

* भास्कराचार्यस्य ग्रन्थाः :-

भास्कराचार्येण पञ्चग्रन्थाः निर्मितास्सन्ति तेषां नामानि अधः लिख्यन्ते।

1. लीलावती।
2. बीजगणितम्।
3. सिद्धान्तशिरोमणिः।
4. करणकुतूहलम्।
5. सर्वतोभद्रम्।

एतेषु सर्वेषु ग्रन्थेषु विभिन्नैः टीकाकारैः टीकाः कृतास्सन्ति।

## *२) महर्षिपतञ्जलिः :-

अनेकेषु प्राचीनग्रन्थेषु पतञ्जलेः गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः। चूर्णिकारः, पदकारश्चेत्येतानि नामानि उल्लिखितानि सन्तीति मीमांसकः। सम्यक् तया ग्रन्थनिर्देशपुरस्सरं निर्दिष्टवान् किन्तु सर्वेषां विदुषां मते गोनर्दीयः गोणिकापुत्रश्चेति नामद्वयं पतञ्जलेरेवेति निश्चप्रचम्।

सूर्यायाञ्जलिदानसमये नद्यां गोणिकायाः अञ्जल्यामागतं सर्परूपं तं दृष्ट्वा सा भयेन पुलोऽञ्जलिं प्रक्षिप्तवती। स सर्प इव बालकरूपेण सञ्जातः। गोणिकया लालितत्वात् गोणिकापुत्र इत्यभिधया प्रसिद्धः, सर्परूपादेव प्रादुर्भावात् नागनाथः, फणिभृत्, अहिपतिः, इत्यादीनि नामानि सञ्जातानि। "गोनर्दीय" इति नाम्नः अयं गोनर्ददेशीयः सिद्ध्यति। मीमांसकस्तु पतञ्जलिं "अभिजानासि देवदत्त काश्मीरान् गमिष्यामस्तत्र सक्तून् पास्यामः" इति महाभाष्य-प्रयोगात् काश्मीरदेशीयं मन्यते।

पाणिनेरष्टाध्यायी विषये पतञ्जलिः महाभाष्ये विशदं विवरणं कृतवानस्ति। पतञ्जलिः पाणिनीय-व्याकरणस्य आदरणीयो विद्वान् वर्तते। यतोहि व्याकरण-सदृशं कठिनमपि विषयं सरलशैल्या पतञ्जलिना प्रतिपादितम्। पतञ्जलिनामहाभाष्ये ~~शब्द~~ शब्दसम्बन्धी-विचारैः सह दार्शनिकविचाराणामपि सारल्येन विवेचनं कृतं विद्यते। अत एव भर्तृहरिराह -

"कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥

विभिन्नानां शास्त्रग्रन्थानां व्याख्याग्रन्थाः भवन्ति ते च ग्रन्थाः "भाष्य" इति शब्देनाभिधीयन्ते। किन्तु पतञ्जलेः भाष्यं स्वकीयमनुपमं वैशिष्ट्यं बिभर्ति। अत एव तस्य संज्ञा "महाभाष्यम्" इति अस्ति। उक्तं

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।"

अतः पाणिनीय सूत्राणां कात्यायनादीनां वार्तिकानामुपरि सरलशैल्या विशिष्टं व्याख्यानम् अत्र प्रदत्तमस्ति तत्कारणात् इदं "महाभाष्यम्" कथ्यते।

पतञ्जलेः शब्दस्य व्युत्पत्तिः "पतत् अञ्जलिः" इति अर्थात् "पतति अञ्जलयोः अञ्जयस्कार्यतिच। यस्मिन् सः।" इति। अतः पतत् इत्यत्र टिभागस्य लोपे पतञ्जलिः शब्दः सिद्ध्यति।

* पतञ्जलेः महाभाष्यम् :-

वैयाकरणेषु महाभाष्यमेवात्यधिकं प्रामाणिकमस्ति अधुना यावत् न कोऽपि महाभाष्यविषये विरुद्धं अवादि। सर्वे तस्य प्रशंसामेव कृतवन्तः।

महाभाष्यस्योपरि विभिन्नैः आचार्यैः विभिन्नाः टीकाः कृताः वर्तन्ते किन्तु प्राप्तासु सर्वासु टीकासु प्रकृष्टतमा टीका "महाभाष्यप्रदीपम्" कैयटस्य वर्तते। यतो हि अस्यां टीकायाम् आद्यधाव्याः सम्पूर्णानि सूत्राणि विवेच्यन्ते तत्पूर्वमपि भर्तृहरिविरचिता "भाष्यदीपिका" टीका आसीदेव। पूर्णरूपेण लब्धा नासीत्। किन्तु कैयटोऽरिक्तभाष्ये स्वीयां प्रौढां व्याख्यां लिलिख। महाभाष्यग्रन्थः शिथिलोऽपि तस्य वैयाकरणमूर्धन्येषु गणना सर्वदैव भवति। जैयटः कैयटपुत्रः आसीत्।

# * आयुर्वेदः *

## * आयुर्वेदस्योद्भवो विकासश्च।

→ आयुर्वेदः तथाविधं शास्त्रं वर्तते येन मनुष्यः स्वकीयमायुषं लभते। अत एव सुश्रुतः आयुर्वेदस्य व्याख्यां इत्थं चकार —

"आयुरस्मिन् विद्यते अनेन वा आयुर्विन्दतीति वा आयुर्वेदः।"

मानवजीवनं सुखमयं भवेत मानवजीवने प्राप्तं शरीरं स्वस्थं भवेत् तथा च व्याधिगतशरीरस्य रोगनिवारणाय महर्षिभिः स्वप्रतिभानुगुणं यस्य शास्त्रस्य निर्माणं कृतं तदेव आयुर्वेदशास्त्रमिति कथ्यते। अत एव उक्तं वर्तते चरकसंहितायाम् :-

"हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानं च ~~तच्च~~ यत्रोक्तमायुर्वेदः स उच्यते॥"

इत्थमायुर्वेदस्य प्रयोजनद्वयं वर्तते। तत्र प्रथमं ① व्याध्युपसृष्टानां व्याधिपरिमोक्षः तथा च द्वितीयं स्वस्थस्य स्वास्थ्यरक्षणम्। आयुर्वेदे नानाविधरोगाणां निवारणार्थं विविधचिकित्सानां वर्णनं प्राप्यते। अतः आयुर्वेदः अथर्ववेदस्य उपवेदः वर्तते।

इदं चायुर्वेदशास्त्रं कुतः आगतम् अस्य शास्त्रस्य विकासः कथं जातः इत्यस्मिन् विषये चरकसंहितायां सुश्रुतसंहितायां च कथामाध्यमेन कथितं वर्तते।

तत्र उक्तं यत् आयुर्वेदशास्त्रस्य प्रथमो वक्ता ब्रह्मा वर्तते। ब्रह्मणः मुखादिदं आयुर्वेदशास्त्रं भगवता प्रजापतिना दक्षेणाधीतम्। दक्षतः अश्विनीकुमाराभ्याम् अधीतम्, अश्विनीकुमाराभ्यामिन्द्रेणाधीतम्, इन्द्रात् ऋषिप्रः- प्राप्तवर्षं भरद्वाजेन इदं शास्त्रम् अधीतम्। महर्षिभरद्वाजेन ततः आयुर्वेदीयशास्त्रज्ञानम् अधीत्य भारतवर्षे तस्य प्रचारः प्रसारः कृतः

* आयुर्वेदस्य उद्भवपरम्परा :-

ब्रह्मा
|
दक्षः
|
अश्विनीकुमारौ
|
इन्द्रः

| भरद्वाजः | धन्वन्तरि | वशिष्ठ |
|---|---|---|
| आत्रेयः पुनर्वसुः | दिवोदासः | तच्छिष्या |
| अग्निवेशः, भेलः | सुश्रुतः, औपधेनवः | |
| जतूकर्णः पराशरः | वैतरणः, औरभ्रः, | |
| हारीतः, क्षारपाणिः | गोपुररक्षितः, भोजः | |

तत्र भरद्वाजः कायचिकित्साप्रवर्तकः तस्य परम्परायां श्रेष्ठः ग्रन्थः "चरकसंहिता" इति। धन्वन्तरिः शल्यचिकित्साप्रवर्तकः तस्य परम्परायां ग्रन्थः "सुश्रुतसंहिता" इति। काश्यपऋषिः बालचिकित्साप्रवर्तकः कौमारभृत्यः तस्य श्लाघनीयो ग्रन्थः "काश्यपसंहिता" इति॥

आयुर्वेदशास्त्रे त्रयो ग्रन्थाः प्रसिद्धाः वर्तन्ते तत्र चरकसंहिता, सुश्रुतसंहिता एवञ्च रत्नसमुच्चयः इति। यथा व्याकरणशास्त्रे मुनित्रयाणां व्यवस्था वर्तते तद्वदेव आयुर्वेदेऽपि चरकः सुश्रुतः वाग्भट्टश्च मुनित्रयम् इत्यनेन अभिधीयन्ते। अत एवोच्यते आत्रेयसंहितायाम्

"अत्रिः कृतयुगे वैद्यो द्वापरे सुश्रुतो मतः।
कलौ वाग्भट्टनामा च गरिमात्र प्रदिश्यते॥
(आत्रेयसंहिता).

"निदाने माधवः श्रेष्ठः सूत्रस्थाने तु वाग्भटः।
शारीरे सुश्रुतः प्रोक्तश्चरकस्तु चिकित्सिते॥
(आत्रेयसंहिता)

* आयुर्वेदस्य अङ्गानि :—

आयुर्वेदस्य अष्टौ अङ्गानि सन्ति। तेषां नामानि यथा —

काय बालग्रहोर्ध्वाङ्ग, शल्य दंष्ट्राजरावृषान्।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता॥"
(अष्टाङ्ग, हृदयम्).

आयुर्वेदस्य एतेषां सर्वेषाम् अङ्गानां इत्थंपरिचयः अधो दीयते।

(1) शल्यतन्त्रम् - तस्य ग्रन्थः औपधेनवतन्त्रम्, सौश्रुततन्त्रम् ।
(2) शालाक्य तन्त्रम् :- ग्रन्थः विदेहतन्त्रम्, शौनकतन्त्रादयः
(3) कायचिकित्सा : ग्रन्थः अग्निवेशसंहिता भेलसंहिता
(4) भूतविद्या - ग्रन्थः चरकसंहितायां मुन्मादन्चिकित्सायाध्याय,
(5) कौमारभृत्य - ग्रन्थः काश्यपसंहिता
(6) अगदतन्त्रम् :- आलम्बायन संहितादयः ग्रन्थाः
(7) रसायन तन्त्रम् - तस्य ग्रन्थः पातञ्जलतन्त्रम्, व्याडितन्त्रम्
नागार्जुन तन्त्रम् इत्यादयः
(8) वाजीकरणम् :- वाजी अर्थात् अश्वः ।

* आयुर्वेदीयाः आचार्याः

(1) आचार्य: चरकः :-

चरकसंहितायां उपदेशः आत्रेयेण पुनर्वसुना कृतः अस्याः संहितायाः प्रणयनम् अग्निवेशेन कृतं प्रतिसंस्कारः चरकेण कृतः तथा च परिवर्धनं दृढबलेन विहितम्। आत्रेयस्य पुनर्वसोः अपराणि नामानि कृष्णात्रेयः, चन्द्रभागी, चान्द्रभागः इत्यादीनि सन्ति। अग्निवेशः आत्रेयस्य शिष्यः आसीत्। आत्रेयस्य षड्शिष्याः भेलः, जतूकर्णः, पराशरः हारीतः तथा क्षीरपाणिः।

चरकसंहितायाः रचयिता आचार्य चरकः वर्तते। प्रतिसंस्कारो नाम मूल ग्रन्थे यत् संक्षिप्तं कथितं वर्तते तस्य विस्तारः एवञ्च यद् विस्तृतं कथितं तस्य संक्षेपेण कथनं एवञ्च प्रतिसंस्कार उच्यते।

"

चरकसंहितायाः उपरि ४० टीकाः सन्ति। किन्तु सर्वाः न मिलन्ति। तत्र प्रसिद्धा टीका भट्टारा हरिश्चन्द्रस्य जेज्जटस्य इत्यादीनां वर्तते।

चरकसंहितायां ८ स्थानानि १२० अध्यायाः सन्ति। तेषां नामानि यथा,

1. सूत्रस्थानम् - अस्मिन् स्थाने ३० अध्यायाः सन्ति।
2. निदानस्थानम् - अष्टौ अध्यायाः
3. विमानस्थानम् -
4. शरीरस्थानम् - अष्टौ अध्यायाः
5. इन्द्रियस्थानम् - १२ अध्यायाः
6. चिकित्सास्थानम् - ३० अध्यायाः
7. कल्पस्थानम् - अन्तिमखण्डः
8. सिद्धिस्थानम् - १२ अध्यायाः

"

(2) सुश्रुतः आचार्यः :-

आयुर्वेदस्य इतिहासे चरकानन्तरं सुश्रुतस्य महत्वपूर्णं स्थानं वर्तते। अस्य आचार्यसुश्रुतस्य सुश्रुतसंहिता चरकसंहितावद् उपादेया प्राचीना च वर्तते। सुश्रुतसंहितायाः उपदेष्टा काशीपतिः दिवोदासः वर्तते। यः धन्वन्तरेः अवतारः मन्यते। अस्याः संहितायाः श्रोता सुश्रुतः वर्तते।

संहितायामस्यां षड्खण्डाः सन्ति। ते च अधो निर्दिश्यते।

(1) सूत्रस्थानम् :- ४६ अध्याय: शल्यचिकित्साया: वर्णनम्।
(2) निदानस्थानम् :- १६ अध्यायाः शल्यसम्बन्धी रोगाणां वर्णनम्
(3) शारीरस्थानम् :- १० अध्यायाः शरीरावयवानां वर्णनम्।
(4) चिकित्सा स्थानम् - ४० अध्यायाः स्वस्थप्रयोगस्य विशदं विवरणम्।
(5) कल्पस्थानम् :- ८ अध्यायाः अगदतन्त्रस्य वर्णनम्।
(6) उत्तरतन्त्रम् :- ६६ अध्यायाः रोगचिकित्सायाः वर्णनम्।

पञ्चसु खण्डेषु १२० अध्यायाः सन्ति एवञ्च अन्तिमे उत्तरतन्त्रे ६६ अध्यायाः सन्ति इति कृत्वा सुश्रुतसंहितायामाहत्य "१८६" अध्यायाः वर्तन्ते।

सुश्रुतसंहितायां उपरि माधवकरस्य "सुश्रुतश्लोकवार्तिकम्" नाम्ना टीका वर्तते। तथा च डल्लणस्य "निबन्धसङ्ग्रह" नाम्ना टीका प्राप्यते।

आयुर्वेदस्य इतिहासं ज्ञातुं चरकसंहितावद् सुश्रुतसंहितापि महत्त्वपूर्णा वर्तते। सुश्रुतसंहिता "शल्यचिकित्सायाः प्रधानो ग्रन्थः वर्तते। शल्यचिकित्सायाः कर्ता दिवोदासः धन्वन्तरि शिष्यः अतः ये शल्यचिकित्सकाः भवन्ति ते धान्वन्तरीयाः इति नाम्ना अभिधीयन्ते। चरकसंहिता कायचिकित्सायाः प्रमुखो ग्रन्थः वर्तते तद्वदेव सुश्रुतसंहिता शल्यचिकित्सायाः प्रमुखो ग्रन्थः वर्तते। इति।

(3) वाग्भट्टः :-

वाग्भट्टस्य चत्वारो ग्रन्थाः वर्तन्ते । (1) अष्टाङ्गसङ्ग्रहः (2) मध्यसंहिता (3) अष्टाङ्गहृदयम् (4) रसरत्नसमुच्चयः (रस वाग्भट्टः).

(1) अष्टाङ्गसङ्ग्रहः : ६ स्थानानि, १५० अध्यायाः
तथा च द्वादशसहस्रं श्लोकाः सन्ति । अतः द्वादश-साहस्री इत्यपि उच्यते ।

(2) अष्टाङ्गहृदयम् :- ६ स्थानानि १२० अध्यायाः
(७१२०) श्लोकाः)

(3) मध्यसंहिता :- कदाचित् द्वादशसाहस्री इत्यपि कथ्यते ।

(4) रसरत्नसमुच्चयः :- २ खण्डौ, ३० अध्यायाः
१ तः ११ अध्यायाः रसशास्त्रविषयकाः
१२ तः ३० अध्यायाः चिकित्साशास्त्रीय

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. Date :

Ref.No.SSSU/International Conference-2020/0785/20 दिनाङ्कः – २२.१.२०२०

**प्रति,**
**प्राचार्याः,**
**संस्कृतमहाविद्यालयः,**
**गुजरातराज्यम् ।**

विषयः – **"भाष्यपरम्परा ज्ञानप्रवाहश्च" – इति केन्द्रस्थं विषयमाश्रित्य प्रवर्तिते श्रीसोमनाथसंस्कृतविश्वविद्यालयेन समायोज्यमाने अन्ताराष्ट्रियपरिसंवादे भवतां सहभागविषये ।**

माननीयाः महोदयाः,
सादरं वन्दनानि!

जानन्ति एव भवन्तः यत् ११-२-२०२० तः १३-२-२०२० पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'भाष्यपरम्परा ज्ञानप्रवाहश्च' इति विषये अन्ताराष्ट्रियः परिसंवादः समायोज्यमानः अस्ति। भारतस्य नैकेभ्यः भागेभ्यः विदेशेभ्यश्च वरिष्ठाः शास्त्रपण्डिताः समागत्य परिसंवादेऽस्मिन् स्वीयान् विचारान् प्रस्तोष्यन्ति। परिसंवादस्य अङ्गतया दुर्लभायाः अष्टावधानकलायाः, संस्कृतकविसम्मेलनस्य च आयोजनं वर्तते ।

प्रसङ्गेऽस्मिन् तत्रभवन्तः भवतां महाविद्यालये पाठयद्भिः गुरुभिः सहिताः परिसंवादे श्रोतृरूपेण भागं वोढुं सादरमामन्त्र्यन्ते। श्रोतृत्वेन भागग्रहीतृभिः परिसंवादस्य सर्वेष्वपि सत्रेषु अनिवार्यतया उपस्थातव्यम्। भागग्रहणेच्छुकाः २५.१.२०२० दिनाङ्कं यावत् https://bit.ly/2YOl00S इत्यत्र स्वीयं विवरणम् ओन्-लाईन प्रपूरयेयुः। ततश्च विश्वविद्यालयात् आमन्त्रणपत्रं प्रेषयिष्यते। परिसंवादस्थले श्रोतृणां निवासभोजनादिव्यवस्थाः विश्वविद्यालयेन निःशुल्कं परिकल्पयिष्यन्ते। परिसंवादान्ते श्रोतृभ्यः सहभागिताप्रमाणपत्रमपि प्रदास्यते।

अस्य विषये अधिकाय विवरणाय डॉ. दीपेश विनोद कतिरा – ९५९४३५६८५७ अथवा डॉ. जानकीशरण आचार्यः ८७५८८१७५२५ इत्यनयोः सम्पर्कः विधातुं शक्यते।

भवदीयः स्वागताभिलाषी,

दे. ना. पाण्डेय

**प्रो. देवेन्द्रनाथ पाण्डेयः**
(परिसंवाद-मुख्यसंयोजकः)

# Shree Somnath Sanskrit University

**(Estd. by Government of Gujarat)**

Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)

Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com

Website : www.sssu.ac.in


Ref No. ससस्यु/अन्ताराष्ट्रिय परिसंवाद-२०२०/०८११/२०२० Date दि.०३.०२.२०२०

सविधे,

श्री विनयकिरण एच्.

TGT (संस्कृतम्)

केन्द्रीय विद्यालयः, जेतपुरम्, पेढला पोरबन्दर हाइवे, जेतपुर्-३६०३७०

विषयः - श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोज्यमाने अष्टावधानकलाप्रदर्शने तत्रभवतः आमन्त्रणविषये ।

माननीय विद्वद्वर,

नमांसि! महतः प्रमोदस्य विषयोऽयं यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ११ तः १३ फ्रेबुअरि, २०२० दिनाङ्केषु 'भाष्यपरम्परा ज्ञानप्रवाहश्च' (Tradition of Commentaries and the Dynamics of Knowledge) इति विषये अन्ताराष्ट्रियः परिसंवादः आयोज्यमानोऽस्ति।

एतदन्तर्गतमेव फरवरी ११ दिनाङ्के सायं **अष्टावधानकलाप्रदर्शनम्** अपि सम्पत्स्यते। भवान् संस्कृतशास्त्राणां प्रतिष्ठितः विद्वान् वर्तते। अतः अष्टावधानकलाप्रदर्शने भवान् पृच्छकत्वेन भागं वोढुं सादरमामन्त्र्यते।

कार्यक्रमस्थानं प्रति तत्रभवतः गमन-आगमनाय रेलयानस्य वातानुकूलित-द्वितीयश्रेण्याः (2nd AC) नियमानुसारं पुरस्कारदानम्, निवासादिव्यवस्थाः च विश्वविद्यालयेन करिष्यन्ते।

अस्मदामन्त्रणस्य स्वीकृतिं सूचयत् पत्रं शीघ्रमेव संप्रेष्य अनुग्रहीष्यति इति आशासानः,

भवदीयः

[signature]

प्रो. देवेन्द्रनाथ पाण्डेयः

(मुख्यसंयोजकः)

अन्ताराष्ट्रियपरिसंवादविषये पृच्छायां सत्याम् अत्र सम्पर्कः कर्तुं शक्यते –

- प्रो. देवेन्द्रनाथ पाण्डेयः, मुख्यसंयोजकः (मो० 9328707436)
- डॉ. दीपेश विनोद कतिरा, संयोजकः (मो० 9594356857)
- डॉ. जानकीशरण आचार्य, संयोजकः (मो. 8758817525)

ई-मेल् sssu.conference@gmail.com

SHREE SOMNATH SANSKRIT UNIVERSITY VERAVAL

# "अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्"

## Critical Editing of unknown Commentaries on Shivamahimnastotra

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागे तत्त्वाचार्य (M.Phil)

इति उपाधये प्रस्तुतः लघुशोधनिबन्धः।

A Dissertation Submitted to Shree Somnath Sanskrit University for the Award of Degree of Master of Philosophy (M.Phil) in Sahitya.


मार्गदर्शकः
प्रा. डॉ. नरेन्द्रकुमार पण्ड्या
प्रधानाचार्यः
श्रीसोमनाथसंस्कृतविश्वविद्यालय सञ्चालित
संस्कृतमहाविद्यालयः,वेरावलम्

अनुसन्धात्री
राधिका प्रेमजीभाई बरासरा
एम.ए.,बी.एड.



श्रीसोमनाथसंस्कृतविश्वविद्यालयः
वेरावलम् --३६२२६६
वर्षम् -२०१९-२०


Scanned with CamScanner

# "अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्"

# Critical Editing of unknown Commentaries on Shivamahimnastotra

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागे तत्त्वाचार्य (M.Phil) इति उपाधये प्रस्तुतः लघुशोधनिबन्धः।

A Dissertation Submitted to Shree Somnath Sanskrit University for the Award of Degree of Master of Philosophy (M.Phil) in Sahitya.


मार्गदर्शकः

प्रा. डॉ. नरेन्द्रकुमार पण्ड्या

प्रधानाचार्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-

संस्कृतमहाविद्यालयः, वेरावलम्

अनुसन्धात्री

राधिका प्रेमजीभाई बरासरा

एम.ए., बी.एड.



श्रीसोमनाथसंस्कृतविश्वविद्यालयः

वेरावलम् - ३६२२६६

वर्षम् - २०१९-२०



Scanned with CamScanner

**श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् , गुजरातम्**

**प्रमाणपत्रम्**

"अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्" (Critical Editing of unknown Commentaries on Shivamahimnastotra) इत्याख्योऽयं लघुशोधप्रबन्धः आयुष्मत्या राधिका प्रेमजीभाई बरासरा इति नामाख्यया अनुसन्धात्र्या मदीये मार्गदर्शने निर्मितः। अनया अत्र अपेक्षिताः सर्वेऽपि अंशाः यथाविधि स्वप्रयत्नेन संशोधिताः सन्ति। अस्य लघुशोधप्रबन्धस्य निष्कर्षः अस्याः एव अनुसन्धात्र्याः परिश्रमफलम् अस्ति। निर्दिष्टे समयावधौ अनया एषः लघुशोधप्रबन्धः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य तत्वाचार्य (M.Phil) इति उपाधये समर्प्यते इति अहं प्रमाणीकरोमि।

स्थलम् - वेरावलम् इत्थम्

दिनाङ्कः -

न.त्रा.पण्ड्या

मार्गदर्शकः

प्रा. डॉ. नरेन्द्रकुमार पण्ड्या (प्रधानाचार्यः)

श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-

संस्कृतमहाविद्यालयः, वेरावलम्

Scanned with CamScanner

# प्रतिज्ञापत्रम्

अहं राधिका प्रेमजीभाई बरासरा, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यविभागे तत्त्वाचार्य (M.Phil) इति उपाधये प्रा. डॉ. नरेन्द्रकुमार पण्ड्या महोदयानां मार्गदर्शनेन "अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्" (Critical Editing of unknown Commentaries on Shivamahimnastotra) इति शीर्षकेण स्वप्रयत्नेन लघुशोधप्रबन्धं लिखितवती। अस्य लघुशोधप्रबन्धस्य कृते सर्वाः सामग्र्यः मया मार्गदर्शकाणां निर्देशानुसारम्, संशोधननियमानां पालनपूर्वकं तथा मातृकाणाम् अवलोकनेन सङ्कलिताः सन्ति। अहं प्रतिज्ञां करोमि यत् अस्मिन् विषये पूर्वं कुत्रापि संशोधनं जातं नास्ति तथा कस्मैचिदपि उपाधये एषः शोधप्रबन्धः प्रदत्तः नास्ति।

स्थलम् - वेरावलम् एवं विनीता

दिनाङ्कः -

राधिका प्रेमजीभाई बरासरा

Scanned with CamScanner

# कृतज्ञताज्ञापनम्

"अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः समीक्षितं पाठसम्पादनम्" इति शीर्षकेण आरब्धः एषः लघुशोधनिबन्धः सम्पन्नः अभवत्। तत्त्वाचार्य इति उपाधये पठनार्थं मम पित्रोः अनुमतिः आशीर्वादः च आसीत् एव, अतः तयोः कृते प्रणामसहितं कृतज्ञभावं प्रकटयामि।

संशोधनस्य विषयचयने परमगुरुः श्रीमान् वसन्तकुमार-भट्टमहोदयः मार्गदर्शनं कृतवान्, तं प्रति वन्दनसहितं धन्यवादभावं प्रकटयामि।

संशोधनस्य कृते मातृकाप्राप्तिः आवश्यकी। मातृकाप्राप्तये आचार्य-कैलाससागरसूरी-ज्ञानमन्दिर-कोबा, गान्धीनगरम् इति संस्थायाः समये समये सहयोगः प्राप्तः अतः ज्ञानमन्दिरस्य सञ्चालकानां कृते व्यवस्थापकानां च कृते धन्यवादवचनानि समर्पयामि।

संशोधनकार्ये आगतानां शङ्कानां निवारणं कृतवतः तथा उचितं मार्गदर्शनं कृतवतः मार्गदर्शकस्य गुरुवरस्य प्रा. डॉ. नरेन्द्रकुमार पण्ड्या

Scanned with CamScanner

महोदयस्य प्रणामसहितं कृतज्ञभावं प्रकटयामि।

संशोधनकार्ये नियमादीनां मार्गदर्शनं कृतवतः तथा मातृकाप्राप्तये विविधसंस्थानां सम्पर्कसूत्रादिप्राप्तये सहायतां कृतवतः गुरोः डॉ. कार्तिक-पण्ड्या-महोदयस्य कृते कृतज्ञतावचनानि समर्पयामि।

लघुशोधप्रबन्धस्य भाषापरिष्कारं टङ्कणपरिष्कारं च कृतवतः तथा समये समये संशोधने अपि सहायतां कृतवतः श्रीजिगरभट्टस्य कृते धन्यवादवचनानि निवेदयामि।

संशोधनकार्ये आवश्यकानां ग्रन्थानां प्राप्तिः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयतः सरलतया अभवत् अतः ग्रन्थालयकर्मचारिणां कृते धन्यवादवचनानि समर्पयामि।

इत्थम्

राधिका प्रेमजीभाई बरासरा

Scanned with CamScanner




Scanned with CamScanner

# अनुक्रमः


पृष्ठाङ्काः

* भूमिका ०३
* प्रथमं प्रकरणम्- स्तोत्रसाहित्यस्य परिचयः ०६

१.१ स्तोत्रसाहित्यस्य उद्भवः

१.२ स्तोत्रसाहित्यस्य विकासक्रमः

१.२.१ रामायणे स्तोत्राणि

१.२.२ महाभारते स्तोत्राणि

१.२.३ पुराणेषु स्तोत्राणि

१.२.४ महाकाव्येषु स्तुतयः

१.२.५ स्वतन्त्रस्तोत्रकाराः तेषां स्तोत्राणि च

१.३ कानिचन प्रसिद्धानि स्तोत्राणि

१.३.१ विष्णुस्तोत्राणि

१.३.२ शिवस्तोत्राणि

१.३.३ देवीस्तोत्राणि

१.३.४ अन्यानि स्तोत्राणि

१.४ स्तोत्रसाहित्ये शिवमहिम्नःस्तोत्रस्य स्थानम्

* द्वितीयं प्रकरणम् - "पाठसम्पादनपद्धतिः" ३०




Scanned with CamScanner

• तृतीयं प्रकरणम्

"अज्ञातकर्तृकायाः शिवमहिम्नःस्तोत्रटीकायाः मातृकायाः परिचयः" ३३

३.१ मातृकायाः प्राप्तिस्थानम्

३.२ मातृकायाः कर्ता

३.३ मातृकायाः कालः

३.४ मातृकायाः कलेवरम्

• चतुर्थं प्रकरणम् - "मूलग्रन्थः" ३६

• पञ्चमं प्रकरणम् - "समीक्षितं पाठसम्पादनम्" ५३

• उपसंहारः ७१

• सन्दर्भग्रन्थाः ७२



Scanned with CamScanner

||श्रीसरस्वत्यैनमः||

# भूमिका

प्राचीने काले सर्वविधं ज्ञानं प्रायः श्रुतिपरम्परया एव प्रचलितं विस्तारितं च भवति स्म। अतः एव वेदानाम् अपरं नाम श्रुतिः इति अस्ति। वस्तुतः तु तस्मिन् काले मानवानां बुद्धिः तीक्ष्णा भवति स्म। तस्मात् ग्रन्थानां काऽपि आवश्यकता न भवति स्म। कालक्रमेण शनैः शनैः जनानां बुद्धिः क्षीणा अभवत् अतः ज्ञानस्य स्थिरता आवश्यकी अभवत्। अनेन प्रकारेण श्रुतिपरम्परा पठनपरम्परा अभवत्। पठनं लेखनं च तदा एव उद्भूतम्। पाणिनीयशिक्षायां पाठकस्य दोषाः निर्दिष्टाः सन्ति यथा -

**"गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाकऽधमाः।।"[1]**

अस्मिन् श्लोके लिखितपाठकः इति शब्दः अस्ति। तस्य अर्थः भवति लिखितस्य पाठकः। अर्थात् तस्मिन् काले लेखनं तथा लेखनस्य पाठनम् आरब्धम् आसीत्।

ग्रन्थस्य लेखनं लिपिकः करोति स्म। सः मूलग्रन्थं पठित्वा तस्य ग्रन्थस्य अनेकाः प्रतिलिपीः करोति स्म। तस्मिन् काले यन्त्राणि न आसन् अतः प्रत्येकग्रन्थस्य लेखनं भवति स्म। यदा लिपिकः एकं ग्रन्थं दृष्ट्वा प्रतिलिपिं करोति तदा प्रमादतः दोषाः अपि भवन्ति। अनेन कारणेन दोषयुक्तः पाठः प्रचलितः भवति। कदाचित् लिपिकः स्वस्य पाण्डित्यं प्रदर्शयितुं स्वयमेव मूलग्रन्थस्य पाठं परिवर्तनं कृत्वा लिखति। एवं रीत्या मूलग्रन्थस्य हानिः भवति तथा रचनाकारस्य लिखितः मूलग्रन्थः दूरे तिष्ठति, लिपिकारस्य प्रतिलिपिः च प्रचलिता भवति। यावत् पर्यन्तं मूलग्रन्थस्य प्राप्तिः न भवति तावत् पर्यन्तं तस्य ग्रन्थस्य साहित्यिकं मूल्याङ्कनम् अपि न भवति।

---

[1] पाणिनीयशिक्षा-32



Scanned with CamScanner

वर्तमानसमये एतादृश्यः प्रतिलिपयः अधिकाः प्राप्यन्ते। तासु संशोधनं समीक्षणं च पाठसम्पादकाः पाठसमीक्षकाः च कुर्वन्ति। यथाशक्यं ग्रन्थतः दोषाणां पाठभेदानां च संशोधनं कृत्वा पाठसमीक्षकाः प्रायः मूलपाठस्य समीपस्थं पाठं प्रस्तुवन्ति। अनेन प्रकारेण महाभारतस्य रामायणस्य च पाठसम्पादनं प्रमुखतया अभवत् अन्यग्रन्थानाम् अपि समीक्षितं पाठसम्पादनं वर्तमानकाले भवति।

मातृकासु प्रायः सर्वेषां शास्त्राणां ग्रन्थाः भवन्ति। दार्शनिकग्रन्थाः काव्यनाट्य-ग्रन्थाः टीकाग्रन्थाः अन्यग्रन्थाः च मातृकारूपेण प्राप्यन्ते। मातृकाः तु विविधासु लिपिषु भवन्ति अतः मातृकायाः लिप्यन्तरणं कृत्वा प्रकाशनं करणीयम्। तेन मातृकायां स्थितं ज्ञानं सर्वे जनाः प्राप्तुं शक्नुवन्ति। लिप्यन्तरणं कर्तुं लिपिज्ञानम् अतीव आवश्यकम् अस्ति।

यथा मूलग्रन्थाः मातृकारूपेण सन्ति तथैव तेषां ग्रन्थानां टीकाः अपि मातृकारूपेण सन्ति। टीकासु प्रायः दार्शनिकग्रन्थानां काव्यानां नाटकानां विविधस्तोत्राणां च टीका भवन्ति। टीकाः ग्रन्थस्य विशिष्टं भावं प्रकटयन्ति। अहम् अपि मातृकायाः लिप्यन्तरं कृत्वा किमपि संशोधनं करोमि इति मम ईच्छा आसीत्। किन्तु वस्तुतः किं कथं च करोमि इति संशयः आसीत् तदा गुजरातस्य प्रसिद्धः विद्वान् प्रो.डॉ.वसन्तकुमारः भट्टः मम सहायतां कृतवान्। सः उक्तवान् यत् **"शिवमहिम्नःस्तोत्रस्य अज्ञातकर्तृका टीका कोबासङ्ग्रहालये अस्ति तस्याः समीक्षितं पाठसम्पादनं करोतु।"** इति। अतः अहं गान्धिनगरं गत्वा **"आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिर-कोबा"** तः शिवमहिम्नस्तोत्रस्य तिस्रः टीकाः प्राप्तवती। तासु एकस्याः चयनं कृत्वा मम तत्वाचार्यस्य लघुशोधनिबन्धे तस्याः टीकायाः समीक्षितं पाठसम्पादनं करिष्यामि इति निश्चयः अभवत्।

एतस्मिन् लघुशोधनिबन्धे पञ्च प्रकरणानि भविष्यन्ति। प्रथमे प्रकरणे स्तोत्रसा-हित्यस्य उद्भवं विकासपरम्परां च लिखित्वा शिवमहिम्नःस्तोत्रस्य महत्वं निरूपयामि।



Scanned with CamScanner

द्वितिये प्रकरणे पाठसम्पादनस्य सिद्धान्तान् लिखिष्यामि। तृतीये प्रकरणे प्रस्तुत-मातृकायाः परिचयं प्रदास्यामि। चतुर्थे प्रकरणे मूलग्रन्थं लिप्यन्तरसहितं स्थापयामि। पञ्चमे प्रकरणे अस्याः टीकायाः समीक्षितं पाठसम्पादनं करिष्यामि। अनेन प्रकारेण म म संशोधनस्य रूपरेखा भविष्यति।प्रस्तुतं संशोधनं लघु कलेवरं धरति यतो हि एषः मम संशोधनकार्ये आरम्भः अस्ति। शिवमहिम्नःस्तोत्रस्य पद्यानां टीकां दृष्ट्वा पठित्वा च विशेषरीत्या अर्थबोधः भविष्यति। एषा टीकाः अद्यावधि अप्रकाशिता अस्ति अतः अस्याः प्रकाशनं जिज्ञासूनां तथा शोधच्छात्राणां कृते लाभप्रदं भविष्यति इति आशां करोमि।



Scanned with CamScanner




Scanned with CamScanner

## प्रथमं प्रकरणम् - "स्तोत्रसाहित्यस्य परिचयः"

स्तूयते अनेन इति स्तोत्रम्। स्तु धातोः ष्ट्रन् प्रत्यये सति स्तोत्रम् इति शब्दः सिद्धः भवति। स्तोत्रम् अर्थात् स्तवनं स्तुतिः गुणादिप्रशंसनम्। "स्तोत्रम्" हृदयस्य भाषा अस्ति। भक्तः दीनः भूत्वा स्वस्य आराध्यस्य गुणगानं कर्तुं यस्य प्रयोगं करोति तत् स्तोत्रम्। स्तोत्रे भावतत्वं प्रधानं भवति। वायुपुराणे चतुर्विधं स्तोत्रं कथितं यथा-

**"द्रव्यस्तोत्रं गुणस्तोत्रं कर्मस्तोत्रं तथैव च।**

**चतुर्थमाभिजनिकं स्तोत्रमेतच्चतुर्विधम्।।"[2]**

अर्थात् द्रव्यस्तोत्रम्, गुणस्तोत्रम्, कर्मस्तोत्रम्, आभिजनिकस्तोत्रम् इति चतुर्विधं स्तोत्रम् अस्ति। यत्र द्रव्यस्य स्तवनं भवति तत् द्रव्यस्तोत्रम्। यत्र गुणानां स्तवनं भवति तत् गुणस्तोत्रम्। यत्र कर्मणः स्तवनं भवति तत् कर्मस्तोत्रम्। यत्र च नामसङ्कीर्तनं भवति तत् आभिजनिकं स्तोत्रं भवति। एतस्य स्तोत्रस्य उद्भवः कथम् अभवत्? कथं च विकासः अभवत्? इति अत्र लिख्यते।

### १.१ स्तोत्रसाहित्यस्य उद्भवः -

स्तोत्रसाहित्यस्य परम्परा अतीव प्राचीना अस्ति। स्तुतिः अथवा स्तोत्रं समानम् एव अस्ति। वैदिककाले देवतानां स्तुतिः भवति स्म। अतः स्तोत्रस्य उद्भवः वैदिककाले अभवत् इति वक्तुं शक्नुमः। प्राचीनः वेदः ऋग्वेदः अस्ति। तस्य प्रथमे अध्याये अग्नेः स्तुतिः अस्ति यथा-

**"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।"[3]**

---

[2] वायुपुराण - ५९/५८

[3] ऋग्वेदः-१/१/१



Scanned with CamScanner

ऋग्वेदः तु स्तुतेः भण्डागारः अस्ति। स्थाने स्थाने विविधानां देवतानां स्तुतयः ऋग्वेदे सन्ति। कुत्रचित् अभीष्टप्राप्त्यर्थं, कुत्रचित् रक्षणार्थं, कुत्रचित् ज्ञानार्थम् ऋषयः स्तुतिं कुर्वन्ति स्म। वेदेषु यासां देवतानां स्तुतयः सन्तिः ताः प्रायः प्राकृतिकाः सन्ति। यथा अग्निः, सविता, इन्द्रः, वरुणः, उषा, मरुद्, रुद्रः इत्यादयः। मनुष्यः प्राचीनकालात् एव प्रकृत्या सह जीवति। अतः प्रकृत्याः आवश्यकं तत्वं देवतारूपेण स्तुवन्ति मनुष्याः। शैत्यात् रक्षणाय अग्निः, प्रकाशार्थं सूर्यः, श्वसनार्थं वायुः, वर्षार्थम् इन्द्रः, आरोग्यरक्षणार्थम् अश्विनीकुमारौ इत्यादयः देवाः प्रकृतिरूपाः सन्ति। तेषां स्तुतिम् ऋषयः कुर्वन्ति स्म।

ऋग्वेदे द्विविधाः स्तुतयः सन्ति अध्यात्मरूपाः सकामाः च। यत्र सृष्टेः विज्ञानम्, आत्मतत्वनिरूपणं, ब्रह्मणः स्वरूपं, ज्ञानस्य चर्चा च भवति सा अध्यात्मस्तुतिः अस्ति। अध्यात्मस्तुतिद्वारा परमात्मनः व्यापकत्वं श्रेष्ठत्वं च वर्णितं भवति। अध्यात्मस्तुतिमध्ये प्रमुखम् अस्ति पुरुषसूक्तम्। पुरुषसूक्ते मन्त्रेषु परमात्मनः विराट् स्वरूपं तथा सृष्टेः उत्पत्तिविषयं निरूपणं वर्तते। नासदीयसूक्तं मेधासूक्तम् अन्यसूक्तानि च अध्यात्मरूपाणि सन्ति।

सकामस्तोत्रेषु अग्निसूक्तम्, इन्द्रसूक्तं, पर्जन्यसूक्तम्, उषस्सूक्तम् अन्यानि च सूक्तानि सन्ति। कामनापूर्त्यर्थं धनादिऐश्वर्यप्राप्त्यर्थं च वेदेषु एतेषां देवानां स्तुतिः अस्ति। युद्धे विजयार्थम् इन्द्रस्य स्तुतिः, आरोग्यरक्षणार्थम् अश्विनीकुमारयोः स्तुतिः, अभीष्टप्रा स्त्यर्थं विष्णोः स्तुतिः, स्वास्थ्यसंरक्षणाय अन्नादिप्राप्त्यर्थं च सूर्यस्य स्तुतिः अस्ति। अनेन प्रकारेण सकामस्तुतिः अपि भवति।

यदुर्वेदे अपि पुरुषसूक्तम्, शिवसङ्कल्पसूक्तम्, ईशावास्योपनिषद् दार्शनिकदृष्ट्या महत्वपूर्णम् अस्ति। सृष्टिविज्ञानम्, मनसः विज्ञानम् आत्मनः च विज्ञानम् अत्र वर्णितम् अस्ति। सामवेदः तु गीतिप्रधानः अस्ति। यज्ञेषु उद्गाता ऋग्वेदस्य ऋचां गानं कृत्वा देवानाम् आह्वानं करोति। आह्वानम् अपि स्तुतिसहितम् एव भवति। तथैव अथर्ववेदे



Scanned with CamScanner

पृथिव्याः स्तुतिः प्रसिद्धा अस्ति। पृथिव्याः दार्शनिकं, तात्त्विकं, भौतिकं च स्वरूपम् अत्र वर्णितम् अस्ति। अनेन प्रकारेण वेदानां स्तुतिसमूहं दृष्ट्वा वक्तुं शक्यते यत् स्तोत्रस्य उद्भवः वैदिककाले अभवत् इति।

### १.२ स्तोत्रसाहित्यस्य विकासक्रमः -

वैदिककाले वैदिकानां देवतानां स्तुतिरूपेण स्तोत्रस्य उद्भवः अभवत्। कालक्रमेण रामायणे महाभारते पुराणेषु साहित्यग्रन्थेषु च स्वरूपपरिवर्तनेन सह स्तोत्रसाहित्यस्य विकासः अभवत्। प्रसङ्गानुसारं रामायणादिषु यस्य कस्यापि देवस्य स्तुतिः कृता अस्ति। ततः शङ्कराचार्यादयः आचार्याः स्वतन्त्रतया स्तोत्राणि विरचितवन्तः। अत्र स्तोत्रस्य विकासः कया रीत्या अभवत् इति प्रस्तूयते।

#### १.२.१ रामायणे स्तोत्राणि -

वैदिकसाहित्ये स्तोत्रं बीजरूपम् आसीत् यस्य विकासः रामायणेन सह आरब्धः अभवत्। रामायणम् आदिकाव्यम् अस्ति अतः लौकिकस्तोत्राणाम् उद्भवः तु रामायणे एव जातः। रामायणे विविधेषु स्थानेषु विविधकामनापूर्त्यर्थं तथा प्रभोः गुणानुकीर्तनं कर्तुं स्तुतयः कृताः सन्ति। रावणात् त्रस्ताः भीताः देवाः ब्रह्मणः स्तुतिं कुर्वन्ति।[4] ब्रह्मादयः देवाः पुनः विष्णोः स्तुतिं कुर्वन्ति।[5] रावणः सर्वान् पीडयति अतः तस्य नाशाय एषा स्तुतिः अस्ति। एषा सकामस्तुतिः अस्ति। युद्धकाण्डे १०५ तमः सर्गः "आदित्यहृदयस्तोत्रम्" इति नाम्ना प्रसिद्धः अस्ति। अस्य स्तोत्रस्य अतीव माहात्म्यम् अस्ति। युद्धभूमौ रावणस्य पुरतः स्थितः रामः अगत्स्यवचनात् सूर्यस्य स्तुतिं करोति। एतस्य स्तोत्रस्य पाठेन शत्रूणां नाशः भवति तथा सर्वविधं कल्याणं भवति। तत्र उक्तं यत् -

[4] वाल्मीकि रामायणम् - ०१/१५/६ तः १४ श्लोकाः
[5] तत्रैव - ०१/१५/१९ तः २८ श्लोकाः

"आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।

जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्॥"[6]

"आदित्यहृदयस्तोत्रस्य पाठेन सूर्यं पूजयित्वा रामः रावणं मारयिष्यति" इति अगस्त्यः कथयति। आपत्तियुक्तः मानवः तथा भयभीतः नरः एतस्य स्तोत्रस्य पाठेन दुःखमुक्तः भवति। विजयार्थं रामः अस्य स्तोत्रस्य पाठं करोतु इति अगस्त्यः आज्ञापयति। तत्र उक्तं यत्-

"पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिं।

एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥"[7]

एतस्मिन् आदित्यहृदयस्तोत्रे ३१ श्लोकाः सन्ति। तत्रैव युद्धकाण्डे रावणस्य वधानन्तरं देवाः रामस्य स्तुतिं कुर्वन्ति। स्वयं ब्रह्मा वदति यत्

"त्रींल्लोकान् धारयन् राम देवगन्धर्वदानवान्।

अहं ते हृदयं राम जिह्वा देवी सरस्वती॥"[8]

अर्थात् हे राम! त्वं त्रीन् लोकान् तथा देव-गन्धर्व-दानवान् धारयन् असि। अहं तव हृदयं तथा सरस्वती देवी तव जिह्वा अस्ति। एतस्मिन् स्तोत्रे ३० श्लोकाः सन्ति। स्तोत्रस्य माहात्म्यं स्वयं ब्रह्मा वदति यत्-

"इदमार्षं स्तवं दिव्यमितिहासं पुरातनम्।

ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः॥"[9]

---

[6] तत्रैव - ०६/१०५/४

[7] तत्रैव - ०६/१०५/२६

[8] तत्रैव - ०६/११७/२३

[9] तत्रैव - ०६/११७/३२



Scanned with CamScanner

अर्थात् ये अस्य दिव्यस्तोत्रस्य कीर्तनं करिष्यन्ति तेषां कुत्रापि पराभवः न भविष्यति इति। एवम् उत्तरकाण्डे शिवस्तुतिः विष्णुस्तुतिः तथा अन्याः अपि स्तुतयः सन्ति। रामायणस्य स्तोत्राणि वेदप्रभावितानि सन्ति इति दृश्यते। वेदानां स्तुतिः रामायणे विकसिता अस्ति। लौकिककाव्यस्य उद्भवेन सह रामायणे लौकिकस्तोत्रस्य अपि उद्भवः अभवत् इति वक्तुं शक्नुमः।

**१.२.२ महाभारते स्तोत्राणि -**

महाभारतं विश्वकोशः अस्ति। तत्र यत् अस्ति तत् सर्वत्र अस्ति, तत्र यत् नास्ति तत् कुत्रापि नास्ति इति प्रसिद्धम् अस्ति। महाभारते विविधेषु प्रसङ्गेषु विविधानि स्तोत्राणि सन्ति। सामान्यवर्गः, राजवर्गः, ऋषिवर्गः, देववर्गः, अन्यवर्गाः च महाभारते स्थाने स्थाने स्तुतिं कुर्वन्ति इति दृश्यते। भीष्मः, व्यासः, युधिष्ठिरः, ध्रुवः इत्यादयः ज्ञानयुक्ताः स्तोतारः सन्ति। एतेषां स्तुतिमध्ये अध्यात्मभावः भवति। महाभारतस्य स्तोत्रेषु केषाञ्चित् अतीव महत्वम् अस्ति।

बाणशय्यायाः उपरि भीष्मः आसीत् तदा सः श्रीकृष्णस्य विराट्स्वरूपस्य स्तुतिं कृतवान्। एषा स्तुतिः "भीष्मस्तवराजः" इति नाम्ना प्रसिद्धा अस्ति। नामतः एव ज्ञायते यत् एषः स्तवनानां राजा अर्थात् अतीव महत्वपूर्णः अस्ति। एतस्मिन् स्तोत्रे ८९ श्लोकाः सन्ति। मरणासन्नः भीष्मः कृष्मस्य स्तुतिं करोति।[10] तस्याः अतीव प्रसिद्धः श्लोकः एषः -

**"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।**
**जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।"**[11]

[10] कृताञ्जलिः शुचिर्भूत्वा वाग्विदां प्रवरः प्रभुः।
भीष्मः परमधर्मात्मा वासुदेवमथास्तुवन्।।(म.भा.शा.प.- ४७/१७)

[11] महाभारतम्,शा.प.- ४७/१०२



Scanned with CamScanner

स्तोत्रस्य अन्ते स्वयं श्रीकृष्णः स्तोत्रस्य माहात्म्यं कथयति यत् यः नरः इदं स्तोत्रं पठिष्यति तस्य कृते देवलोकात् अपि उत्तमः मम लोक इव लोकः भविष्यति इति।[12]

वनपर्वणि अर्जुनः शिवस्य स्तुतिं करोति। शिवः प्रसन्नः भूत्वा पाशुपतास्त्रं ददाति। एषा स्तुतिः वनपर्वणि ३९ तमे अध्याये अस्ति। सभापर्वणि द्रौपद्याः अपमानं भवति तथा भीष्मादीनाम् उपस्थितिमध्ये अपि वस्त्राहरणं भवति तदा द्रौपदी श्रीकृष्णस्य स्तुतिं करोति। एषा स्तुतिः सभापर्वणि ६८ तमे अध्याये अस्ति। विराट्पर्वणि युधिष्ठिरः विजयप्राप्त्यर्थं दुर्गायाः स्तुतिं करोति। दुर्गा प्रसन्ना भूत्वा तस्मै विजयस्य वरदानं ददाति। एषा स्तुतिः विराट्पर्वणि षष्ठे अध्याये अस्ति। दक्षः प्रजापतिः यज्ञविध्वंसस्य अनन्तरं शिवस्य स्तुतिं करोति सा स्तुतिः "शिवसहस्रनामस्तोत्रम्" इति नाम्ना प्रसिद्धा अस्ति। तथैव अनुशासनपर्वणि भीष्मस्य युधिष्ठिरस्य च संवादे विष्णोः सहस्रनाम्नां कीर्तनं भवति तत् "विष्णुसहस्रनामस्तोत्रम्" इति नाम्ना प्रसिद्धम् अस्ति।

इत्थं महाभारते स्तोत्रस्य विकसितं स्वरूपं दृश्यते। रामायणे यादृशाणि स्तोत्राणि सन्ति तादृशाणि आध्यात्मिकानि स्तोत्राणि महाभारते अपि सन्ति। तदतिरिच्य "सहस्रनामस्तोत्रम्" इति नामकीर्तनस्तोत्रप्रकारः महाभारते दृश्यते। अनेन प्रकारेण महाभारते स्तोत्राणां विकासः जातः इति अत्र निरूपितम्।

### १.२.३ पुराणेषु स्तोत्राणि -

पुराणेषु कामनारहितानि भक्तिपूर्णानि स्तोत्राणि अधिकानि भवन्ति। विविधाः भक्ताः प्रभोः स्तुतिं कुर्वन्ति। तासु अनेकाः प्रसिद्धाः अपि सन्ति। पुराणस्तोत्रेषु भावमाधुर्यम्

---

[12] यः सम्पठेदिदं स्तोत्रं मम जन्मानुकीर्तनम्।
देवलोकमतिक्रम्य तस्य लोको यथा मम॥(तत्रैव-शा.प.-४७/१२३)



Scanned with CamScanner

अधिकं भवति। पुराणेषु स्तोत्रस्य विभिन्न-प्रकाराणि सन्ति यथा अष्टकम्, कवचम्, नामस्तोत्रम् इत्यादि आध्यात्मिकानि स्तोत्राणि अपि पुराणेषु सन्ति।

प्रमुखेषु अष्टकेषु गणेशाष्टकं पद्मपुराणे अस्ति। शीतलाष्टके शीतलारोगस्य निवारणाय उपायाः सन्ति। पद्मपुराणे सङ्कटाष्टकम् अस्ति यस्य पठनेन सङ्कटस्य निवारणं भवति। तीर्थराजप्रयागस्य महत्त्वं प्रयागाष्टके निरूपितम् अस्ति।

कवचेषु अतिप्रसिद्धं श्रीनारायणकवचं श्रीमद्भागवतपुराणे अस्ति। देवपुरोहितः विश्वरूपः इन्द्राय इदं स्तोत्रं श्रावयति। तस्य पठनेन इन्द्रः वृत्रासुरं जयति। मार्कण्डेयपुराणे प्रभावयुक्तं देवीकवचम् अस्ति। सप्तशतीपठनात् पूर्वम् एतस्य देवीकवचस्य पाठः भवति। तेन भगवती दुर्गा दिग्भ्यः रक्षणं करोति। ब्रह्माण्डपुराणे तुलसीकवचम् अस्ति। अत्र तुलसीमहत्त्वं वर्णितम् अस्ति। ब्रह्मवैवर्तपुराणे सरस्वतीकवचम्, सूर्यकवचम्, श्रीराधिकाकवचम्, श्रीकृष्णकवचम्, महालक्ष्मीकवचम्, लक्ष्मीकवचम्, दुर्गाकवचम् इत्यादीनि कवचस्तोत्राणि सन्ति। कवचस्तोत्राणां पठनेन पाठकस्य सर्वविधं रक्षणं भवति।

नामस्तोत्रेषु अपि कानिचन अतीव प्रसिद्धानि सन्ति। ब्रह्मवैवर्तपुराणे गणेशाष्टनामस्तोत्रम्, वामनपुराणे विष्णोरष्टनामस्तोत्रम्, विष्णोः शतनामस्तोत्रम्, स्कन्दपुराणे गङ्गासहस्रनामस्तोत्रम्, भविष्योत्तरपुराणे सूर्यसहस्रनामस्तोत्रम्, स्कन्दपुराणे केतुपञ्चविंशतिनामस्तोत्रम् इत्यादीनि नामस्तोत्रेषु प्रसिद्धानि सन्ति। नामस्तोत्रेषु प्रायः अष्ट, शतम्, अष्टोत्तरशतम्, सहस्रं च नामानि भवन्ति। पूजादिषु एतेषां नामस्तोत्राणां पठनं ब्राह्मणाः कुर्वन्ति तेन एतेषां महत्त्वं ज्ञायते।

अध्यात्मस्तोत्रेषु अतीव प्रसिद्धा भीष्मस्तुतिः अस्ति। एषा स्तुतिः श्रीमद्भागवतपुराणे प्रथमे स्कन्धे नवमे अध्याये अस्ति। एतस्याः स्तुतेः गानस्य अतीव महत्त्वम् अस्ति। स्तुतिमध्ये एकादश श्लोकाः सन्ति। तत्रैव अष्टमे अध्याये कुन्ती श्रीकृष्णस्य स्तुतिं कृतवती। तत्र २६ श्लोकाः सन्ति। श्रीकृष्णस्य अवतारस्य तथा



Scanned with CamScanner

अविनाशितत्त्वस्य कुन्ती स्तुतिं करोति। तृतीये स्कन्धे त्रयोदशाध्याये ऋषयः वराहस्वरूपस्य भगवतः स्तुतिं कुर्वन्ति। अत्र द्वादशश्लोकाः सन्ति। वराहस्य परब्रह्मत्वम् एतस्यां वर्णितम् अस्ति। चतुर्थे स्कन्धे शिवस्तुतिः विष्णुस्तुतिः तथा ध्रुवकृता भगवत्स्तुतिः अस्ति। ध्रुवद्वारा या स्तुतिः भवति तस्यां द्वादशश्लोकाः सन्ति। एषा अतीव प्रसिद्धा अस्ति। तथैव श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे वृत्रासुरचतुःश्लोकी बहुप्रसिद्धा अस्ति। तदतिरिच्य प्रख्यातस्तोत्रेषु प्रह्लादकृता नृसिंहस्तुतिः सप्तमस्कन्धे, अष्टमस्कन्धे गजेन्द्रकृता भगवत्स्तुतिः, दशमस्कन्धे गर्भस्तुतिः, ब्रह्मणः मोहभङ्गावसरे तेन कृता श्रीकृष्णस्य स्तुतिः, गोपीगीतम्, युगलगीतम्, वेणुगीतम्, वेदस्तुतिः, द्वादशस्कन्धे मार्कण्डेयकृता भगवत्स्तुतिः, अतीव प्रसिद्धाः एताः स्तुतयः सन्ति। तथैव मार्कण्डेयपुराणे शक्रादिस्तुतिः अतीव प्रसिद्धा अस्ति। वर्तमानकाले यज्ञेषु शक्रादिस्तुतेः गानं भवति। पद्मपुराणे उत्तरखण्डे श्रीमृत्युञ्जयस्तोत्रम् अस्ति। तत्र शिवस्य शारिरीकं तथा आध्यात्मिकं स्वरूपं वर्णितम् अस्ति।

अनेन प्रकारेण पुराणेषु स्तोत्राणाम् आधिक्यम् अस्ति। नामस्तोत्राणि, कवचस्तोत्राणि, अष्टकानि तथा अन्यानि स्तोत्राणि पुराणेषु सन्ति। पुराणेषु एतावन्ति स्तोत्राणि सन्ति यत् वयं "पुराणानि स्तोत्रप्रधानानि सन्ति" इति वक्तुं शक्नुमः। पुराणस्तोत्रेषु यस्य स्तुतिः भवति तस्य अतीव मनोहरं वर्णनं भवति। वैदिकस्तोत्रेषु एतत् न दृश्यते अतः पुराणकाले स्तोत्राणां पर्याप्तः विकासः अभवत् इति वक्तुं शक्नुमः।

**१.२.४ महाकाव्येषु स्तुतयः -**

वैदिककाले उत्पन्ना स्तुतिः रामायणे महाभारते पुराणेषु च क्रमेण विकसिता अभवत्। समयानन्तरं महाकाव्यानाम् उद्भवः अभवत्। तेषु अपि विविधरीत्या स्तुतयः कृताः सन्ति। महाकविः कालिदासः रघुवंशे विष्णोः स्तुतिं कुमारसम्भवे ब्रह्मणः च स्तुतिं



Scanned with CamScanner

वर्णितवान् अस्ति। तारकासुरात् त्रस्ताः देवाः द्वितीये सर्गे ब्रह्मणः स्तुतिं कुर्वन्ति। एतस्यां स्तुतौ विविधाः अलङ्काराः सन्ति। विरोधाभासस्य अलङ्कारस्य सुन्दरः श्लोकः यथा -

**"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः।**

**जगदादिरनादिस्त्वं जगदीशो निरीश्वरः॥"[13]**

किरातार्जुनीये महाकाव्ये अर्जुनः शिवस्य स्तुतिं करोति। तया प्रसन्नः शिवः अर्जुनाय पाशुपतास्त्रं ददाति। शिशुपालवधे महाकाव्ये भीष्मः श्रीकृष्णस्य स्तुतिं करोति। नैषधीयचरिते विष्णोः विविधानाम् अवताराणां स्तुतिः अस्ति। हरविजयमहाकाव्ये देवकृता चण्डिकास्तुतिः अस्ति। महाकाव्येषु याः स्तुतयः सन्ति तासु काव्यत्वम् अलङ्काराः च प्रचूरतया सन्ति। महाकवयः दार्शनिकदृष्ट्या स्तुतिमध्ये वर्णनं कृतवन्तः। काव्यार्थं प्रतिभायाः आवश्यकता भवति अतः महाकाव्यानां स्तुतिमध्ये अपि कवीनां प्रतिभादर्शनं भवति। रसयोग्याः शब्दाः तथा अलङ्काराः, गुणाः, कवेः निपुणता च, एतत् सर्वं मिलित्वा काव्यानां स्तुतिं सुन्दरीं सरसां च  करोति। महाकाव्यस्य स्तुतिमध्ये एतेषां निरूपणेन स्तोत्रसाहित्यम् अलङ्कारयुक्तं रसयुक्तं च अभवत् इति वक्तुं शक्नुमः।

### १.२.५ स्वतन्त्रस्तोत्रकाराः तेषां स्तोत्राणि च -

वैदिकस्तुतिः लौकिकस्तुतिः इति द्विविधाः स्तुतयः अभवन्। वेदानां स्तुतयः प्राकृतिकदेवतानां कृते सन्ति। रामायणे पुनः लौकिकस्तोत्रस्य उद्भवः अभवत्। महाभारते वर्णनयुक्तानि स्तोत्राणि तथा नामस्तोत्राणि उद्भूतानि अथवा स्तोत्राणां परम्परा परिवर्तनं प्राप्तवती। पुराणेषु भक्तिप्रधानानि स्तोत्राणि सन्ति। स्तोत्रस्य विकासक्रमः महाकाव्यकाले अलङ्कृतः भावयुक्तः च अभवत्। वेदात् आरब्धा एषा परम्परा महाकाव्यपर्यन्तं पर्याप्तं विकासं प्राप्तवती। एतदनन्तरं केचन स्वतन्त्राः स्तोत्रकाराः अभवन्। ते स्वतन्त्राणि

---

[13] कुमारसम्भवम् - २/९



Scanned with CamScanner

स्तोत्राणि रचितवन्तः। अत्र संक्षेपण स्वतन्त्रस्तोत्रकाराणां तेषां च स्तोत्राणां परिचयः प्रस्तूयते।

- महाकविः अश्वघोषः प्रसिद्धः बौद्धकविः अस्ति। तस्य बुद्धचरितं सौन्दरानन्दं च प्रसिद्धम् महाकाव्यम् अस्ति। अश्वघोषस्य नाम्ना स्रग्धराछन्दोयुक्ता गण्डीस्तोत्र-गाथा प्राप्यते। तत्र २९ श्लोकाः सन्ति तथा बौद्धधर्मस्य आध्यात्मिकं वर्णनम् अस्ति।
- अश्वघोषस्य अनुयायी मातृचेटः आसीत्। तस्य कालः ई.स. प्रथमं शतकम् अस्ति। सः बौद्धस्तोत्रयुक्तं ग्रन्थद्वयं रचितवान् यथा (१) चतुःशतकम् (२) अध्यर्द्धशतकम् इति। वर्तमानकाले तस्य ग्रन्थस्य अवशेषाः एव सन्ति।
- नागार्जुनः इति प्रसिद्धः बौद्धस्तोत्रकारः अभवत्। सः शून्यवादी तथा माध्यमिकशाखायाः आचार्यः आसीत्। तेन चत्वारः स्तवाः रचिताः (१) निरूपमस्तवः (२) लोकातीतस्तवः (३) परमार्थस्तवः (४) निरुत्तरस्तवः इति। एते चत्वारः उपलब्धाः सन्ति।
- महाकविः कालिदासः अतिप्रसिद्धः अस्ति। तस्य नाम्ना अम्बास्तवः, कालीस्तोत्रम्, गङ्गाष्टकम्, चण्डिकादण्डस्तोत्रम् इति स्तोत्राणाम् उल्लेखः अस्ति। एषः अन्यः कालिदासः भवितुं शक्यते।
- सिद्धसेनः दिवाकरः प्रसिद्धः जैनस्तोत्रकारः अस्ति। सः कल्याणमन्दिरस्तोत्रं रचितवान्। एतत् स्तोत्रं जैनेषु अतीव प्रसिद्धम् अस्ति। एतस्मिन् स्तोत्रे वसन्ततिलकाछन्दसि ४४ पद्यानि सन्ति।
- आचार्यः मानतुङ्गः अपि जैनस्तोत्रकारः अस्ति। सः बाणभट्टस्य समकालीनः आसीत्। तेन भक्तामरस्तोत्रं विरचितम्। तत्र ऋषभदेवस्य स्तुतिः अस्ति।
- महाकविः बाणभट्टः अतीव प्रसिद्धः अस्ति। बाणभट्टः चण्डिशतकं विरचितवान्। चण्डिशतके शतं श्लोकाः सन्ति। बाणभट्टस्य गद्यशैली अत्र पद्येषु अपि दृश्यते।



Scanned with CamScanner

- मयूरकविः सूर्यशतकेन प्रसिद्धः अस्ति। कुष्ठरोगेण पीडितः सः कविः स्रग्धरा-छन्दसि शतश्लोकैः भगवतः सूर्यस्य स्तुतिं कृतवान्। फलतः तस्य रोगः नष्टः अभवत्।
- हर्षवर्धनः अपि बौद्धस्तोत्रकारः आसीत्। सः सुप्रभास्तोत्रं तथा अष्टमहाश्री-चैतन्यस्तोत्रं रचितवान्। तत्र बौद्धपरम्परानुसारं सर्वजनहिताय कामना कृता अस्ति।
- जगद्गुरुः आदिशङ्कराचार्यः स्तोत्रसाहित्ये अतीव प्रसिद्धः अस्ति। स्तोत्रसाहित्ये तस्य स्थानम् योगदानं च अतीव महत्त्वपूर्णम् अस्ति। तस्मिन् काले जैन-वादस्य, बौद्धवादस्य, निरीश्वरवादस्य, वेदविरोधिसम्प्रदायानां तथा अन्येषां विकृतसम्प्रदायानां प्रभुत्वम् आसीत्। तदा भगवान् आदिशङ्कराचार्यः विविधानां देवानां देवीनां च स्तोत्राणि रचितवान्। तेन विरचितानि स्तोत्राणि अध्यात्म-प्रधानानि, भावपूर्णानि, दार्शनिकानि च सन्ति। प्रायः द्विशतं स्तोत्राणि शङ्कराचार्येण रचितानि सन्ति। तस्य स्तोत्रेषु भक्तेः भावस्य तथा वेदान्त-ज्ञानस्य अद्भुतः समन्वयः अस्ति। सौन्दर्यलहरी, भवान्यष्टकं, देव्यपराध-क्षमापनस्तोत्रं, निर्वाणषटकं, शिवमानसपूजा, वेदसारशिवस्तवः, शिवपञ्चाक्षर-स्तोत्रं, कृष्णाष्टकं तथा विविधदेवानां प्रातःस्मरणस्तोत्राणि शङ्कराचार्येण रचितेषु प्रसिद्धानि सन्ति। प्रसिद्धस्तोत्राणां परिचये एतेषु केषाञ्चित् स्तोत्राणां परिचयं दास्यामि।
- ध्वन्यालोकस्य रचयिता आनन्दवर्धनाचार्यः बहुप्रसिद्धः अस्ति। तस्य देवीशतकम् अतिप्रसिद्धम् अस्ति। तत्र देव्याः पार्वत्याः स्तुतिः अस्ति। आलङ्कारिक-सौन्दर्यदृष्ट्या अपि अस्य शतकस्य महत्वपूर्ण स्थानम् अस्ति।
- आचार्यः उत्पलदेवः शैवः आसीत्। सः "शिवस्तोत्रावलीं" रचितवान्। भगवतः शिवस्य दार्शनिकं तथा आध्यात्मिकं वर्णनम् अत्र अस्ति। ग्रन्थे विंशतिः स्तोत्राणि सन्ति।



Scanned with CamScanner

- वैष्णवसम्प्रदाये यामुनाचार्यः प्रसिद्धः अस्ति। सः "स्तोत्ररत्नम्" इति ग्रन्थं विरचितवान्। तस्मिन् ग्रन्थे ६५ पद्यानि सन्ति। विशिष्टाद्वैतवादस्य समर्थनेन सह भगवतः विष्णोः भक्तियुक्तं वर्णनम् अस्ति। इदं स्तोत्ररत्नं वैष्णवेषु प्रसिद्धम् अस्ति।
- वेङ्कटनाथः देशिकः दाक्षिणात्यः पण्डितः आसीत्। सः वैष्णवः आसीत्। तस्य वैष्णवस्तोत्राणि प्रायः ३० सन्ति। हयग्रीवस्तोत्रम्, दशावतारस्तोत्रम्, भगवद्ध्यानसोपानम् इति प्रसिद्धानि स्तोत्राणि सः विरचितवान्।
- कविः जयदेवः प्रसिद्धः आलङ्कारिकः अस्ति। तस्य प्रसिद्धं गीतिकाव्यं गीतगोविन्दम् अस्ति। अस्य काव्यस्य रचना अर्धस्तोत्रात्मिका प्रतीयते। कृष्णस्य सुन्दरं सरसं च वर्णनम् अत्र अस्ति।
- चैतन्यः महाप्रभुः बङ्गदेशीयः आसीत्। एषः भक्तिमार्गे अतिप्रसिद्धः अस्ति। भागवताधारेण तेन शिक्षाष्टकम् तथा जगन्नाथाष्टकम् विरचितम् अस्ति।
- रूपगोस्वामी प्रसिद्धः वैष्णवः आसीत्। तेन मुकुन्दमुक्तावली विरचिता अस्ति। अत्र त्रिंशत् पद्यानि सन्ति। मधुरा शब्दावली तथा कृष्णस्य उत्कटा भक्तिः अत्र वर्णिता अस्ति।
- पुष्टिमार्गस्य प्रसिद्धः आचार्यः वल्लभाचार्यः अस्ति। वल्लभाचार्यस्य स्तोत्राणि अतीव प्रसिद्धानि सन्ति। यमुनाष्टकम्, मधुराष्टकम्, कृष्णाष्टकम्, श्रीनन्दकुमाराष्टकम्, इति प्रसिद्धानि स्तोत्राणि श्रीवल्लभाचार्यः विरचितवान्।
- बुधकौशिकऋषेः रामरक्षास्तोत्रम् अतीव प्रसिद्धम् अस्ति।एका कथा अस्ति यत् स्वयं भगवान् शिवः बुधकौशिकमुनेः स्वप्ने रामरक्षास्तोत्रं कथितवान्। प्रातः उत्थाय मुनिः एतत् स्तोत्रं लिखितवान्। एतस्य स्तोत्रस्य प्रभावेण व्याधिः दुःखं सङ्कटं च नश्यति।

अनेन प्रकारेण अत्र केषाञ्चित् स्वतन्त्रस्तोत्रकाराणां तेषां स्तोत्राणां च नामोल्लेखसहितः संक्षिप्तः परिचयः प्रदत्तः। वेदे उद्भूतस्य स्तोत्रस्य कालक्रमे विकसितं

स्वतन्त्रं स्वरूपम् अभवत्। वर्तमानकाले अनेकानि स्वतन्त्रस्तोत्राणि प्राप्यन्ते लिख्यन्ते च। अनेन प्रकारेण अत्र "स्तोत्रस्य उद्भवः विकासपरम्परा च" इति विषये यथाप्राप्तं यथामति प्रस्तुतम्।

**१.३ कानिचन प्रसिद्धानि स्तोत्राणि -**

प्रसिद्धस्तोत्रेषु भगवतः शङ्कराचार्यस्य स्तोत्राणि, वल्लभाचार्यस्य स्तोत्राणि, अन्यानि च स्तोत्राणि सन्ति। तेषां स्तोत्राणां समाजे अतीव प्रचारः प्रसारः च वर्तते। सामाजिकजनाः सामान्यतया एव तत् तत् स्तोत्रं भावपूर्वकं भक्तिपूर्वकं च पठन्ति तथा गायन्ति। अत्र तेषां केषाञ्चित् प्रसिद्धानां स्तोत्राणां संक्षेपेण परिचयं लिखामि। स्तोत्राणि देवविषयकानि भवन्ति अतः शिवस्तोत्राणि, विष्णुस्तोत्राणि, देवीस्तोत्राणि बहुप्रसिद्धानि सन्ति। अत्र विभागानुसारं तत्तद्देवस्य प्रसिद्धस्तोत्राणां परिचयं लिखामि।

**१.३.१ विष्णुस्तोत्राणि -**

प्रसिद्धस्तोत्राणां यदि गणनां कुर्मः तदा विष्णोः स्तोत्राणि अधिकानि स्युः। पुराणेषु विष्णुः मुख्यः देवः अस्ति अतः स्थाने स्थाने तस्य स्तोत्राणि सन्ति एव, अपितु स्वतन्त्रस्तोत्रपरम्परायाम् अपि विष्णोः स्तोत्राणि बहुप्रसिद्धानि सन्ति। पुराणादिषु यानि स्तोत्राणि सन्ति तेषां परिचयः तत्र प्रदत्तः अस्ति। अत्र केवलं प्रसिद्धानां केषांञ्चित् स्तोत्राणाम् एव परिचयं लिखामि।

**(१) अच्युताष्टकम् -**

"अच्युतं केशवं रामनारायणम्....." इत्यादि अच्युताष्टकम् अतीव प्रसिद्धम् अस्ति। एतस्य रचयिता भगवान् आदिशङ्कराचार्यः अस्ति। अष्टकम् इति नाम्ना एव प्रतीयते यत् अस्मिन् अष्टश्लोकाः स्युः। भगवतः विष्णोः विविधानि नामानि अत्र कीर्तितानि सन्ति। नवमे श्लोके अस्य स्तोत्रस्य कीर्तनफलं कथितम् अस्ति।



Scanned with CamScanner

**(२) विष्णुपादादिकेशान्तवर्णनम् -**

एतत् स्तोत्रं भगवान् आदिशङ्कराचार्यः विरचितवान् अस्ति। एतस्मिन् स्तोत्रे ५१ श्लोकाः सन्ति। अत्र भगवतः विष्णोः केशेभ्यः आरभ्यः चरणपर्यन्तं मनोहरं सुन्दरं च वर्णनम् अस्ति। एतस्य स्तोत्रस्य पठनेन अन्तःकरणं विशुद्धं भवति इति फलश्रुतौ भगवता शङ्कराचार्येण लिखितम्। वैष्णवेषु इदं स्तोत्रं बहु प्रसिद्धम् अस्ति।

**(३) श्रीविष्णुमहिम्नःस्तोत्रम् -**

परमहंसः स्वामी ब्रह्मानन्दः एतस्य स्तोत्रस्य रचयिता अस्ति। एतस्मिन् स्तोत्रे ३५ पद्यानि सन्ति यत्र भगवतः विष्णोः दिव्यः महिमा वर्णितः अस्ति। विविधानां प्रसङ्गानाम् उल्लेखेन सह विष्णोः परमात्मनः माहात्म्यम् अत्र वर्णितम् अस्ति। इदं स्तोत्रं शिवमहिम्नःस्तोत्रात् प्रेरणां प्राप्य ब्रह्मानन्दस्वामिना विरचितम् अस्ति।

**(४) कमलापत्यष्टकम् -**

इदं स्तोत्रमपि ब्रह्मानन्दः स्वामी विरचितवान्। अस्य स्तोत्रस्य सर्वेषु श्लोकेषु अन्तिमा पङ्क्तिः अस्ति "भजत रे मनुजाः कमलापतिम्" अतः स्तोत्रस्य नाम कमलापत्यष्टकम् अभवत्। अस्मिन् स्तोत्रे नव पद्यानि सन्ति। कमलापतिः विष्णुः एव सर्वदा सर्वथा च भजनीयः इति अस्य स्तोत्रस्य तात्पर्यम् अस्ति।

**(५) श्रीदशावतारस्तोत्रम् -**

भगवतः विष्णोः दशावताराणां वर्णनयुक्तम् इदं स्तोत्रं महाकविः जयदेवः विरचितवान् अस्ति। एतस्मिन् स्तोत्रे ११ पद्यानि गीतिमयानि तथा पदावल्या रमणीयानि सन्ति। मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-बलराम-बुद्ध-कल्कि-अवताराणां स्तवनम् अत्र अस्ति। कृष्णस्य उल्लेखः नास्ति अतः वक्तुं शक्यते यत् जयदेवः श्रीकृष्णम् अवताररूपेण न गणयति।



Scanned with CamScanner

(६) श्रीकृष्णाष्टकम् -

"भजे व्रजैकमण्डनं समस्तपापखण्डनम्....." इत्यादि अष्टश्लोकैः युक्तं श्रीकृष्णाष्ट-कम् अतिप्रसिद्धम् अस्ति। एतस्य रचयिता भगवान् आदिशङ्कराचार्यः अस्ति। अनुप्रासालङ्कारस्य आधिक्येन युक्तम् इदं स्तोत्रं यः पठति सः जन्मनि जन्मनि श्रीकृष्णे भक्तिमान् भवति इति फलश्रुतौ लिखितम् अस्ति।

(७) गोविन्ददामोदरस्तोत्रम् -

"गोविन्द दामोदर माधवेति" इति पद्यांशेन अतिप्रसिद्धम् अस्ति गोविन्ददामोदरस्तोत्रम्। एतस्य स्तोत्रस्य रचयिता श्रीबिल्वमङ्गलाचार्यः अस्ति। अस्मिन् स्तोत्रे ७१ पद्यानि तथा सर्वेषां श्लोकानाम् अन्ते "गोविन्द दामोदर माधवेति" इति प्रयोगः अस्ति अतः स्तोत्रस्य नाम गोविन्ददामोदरस्तोत्रम् अभवत्।

(८) मधुराष्टकम् -

श्रीमद्-वल्लभाचार्येण विरचितम् इदं मधुराष्टकं वैष्णवसम्प्रदाये अत्यन्तं प्रसिद्धम् अस्ति। मधुराधिपतेः भगवतः श्रीकृष्णस्य सर्वमपि मधुरम् अस्ति इति आचार्येण अष्टभिः श्लोकैः अत्र सुन्दरपदावल्या वर्णितम् अस्ति।

(९) रामरक्षास्तोत्रम् -

भगवतः श्रारामचन्द्रस्य इदं रक्षास्तोत्रं बहु प्रसिद्धम् अस्ति। अस्य स्तोत्रस्य रचयिता बुधकौशिकः मुनिः अस्ति। दन्तकथानुसारं श्रूयते यत् भगवान् शिवः मुनेः बुधकौशिकस्य स्वप्ने आगत्य इदं स्तोत्रं कथितवान्। प्रातः उत्थाय मुनिना तत् लिखितम्। इदमेव रामरक्षास्तोत्रम् उच्यते। अस्मिन् स्तोत्रे ३८ श्लोकाः सन्ति। अस्य स्तोत्रस्य बहवः श्लोकाः प्रसिद्धाः सन्ति यथा "रामो राजमणिः....." इत्यादि विभक्तिश्लोकः, "राम रामेति रामेति" इति वा।



Scanned with CamScanner

### १.३.२ शिवस्तोत्राणि -

शिवः सद्यः प्रसीदति अतः शिवस्य स्तोत्राणि अपि अनेकानि उपलभ्यन्ते। शिवस्य स्तोत्राणां बाहुल्यं शङ्कराचार्येण रचितेषु स्तोत्रेषु अस्ति। तदतिरिच्य रावणकृतं शिवताण्डवस्तोत्रं तथा पुष्पदन्तविरचितं शिवमहिम्नःस्तोत्रमपि अतिप्रसिद्धं वर्तते। अत्र शिवस्य स्तोत्रेषु प्रसिद्धानां स्तोत्राणां परिचयं लिखामि।

**(१) शिवताण्डवस्तोत्रम् -**

प्रकाण्डपण्डितेन असुरराज-रावणेन भगवतः शिवस्य प्रसन्नतार्थम् इदं स्तोत्रं विरचितम्। अस्मिन् स्तोत्रे १५ पद्यानि सन्ति। उद्धतपदानां प्रयोगेण ताण्डवस्तोत्रं सत्यमेव पदानां ताण्डवं प्रतिभाति। रावणः शिवभक्तः आसीत् अतः सः इदं स्तोत्रं रचितवान्। शिवः यदा ताण्डवं करोति तदा तस्य स्वरूपं कीदृशं भवति इति अस्मिन् स्तोत्रे रावणेन प्रतिपादितम् अस्ति।

**(२) शिवमानसपूजा -**

भगवान् आदिशङ्कराचार्यः अस्य सेतोत्रस्य रचयिता अस्ति। एतस्मिन् स्तोत्रे भगवतः शिवस्य मानसिकी पूजा वर्णिता अस्ति। मानसकल्पितान् पदार्थान् शिवाय समर्पयति भावकः। अन्ते वदति यत् शिवः आत्मा, मतिः पार्वती, भूतगणाः प्राणाः, शरीरं मन्दिरं, विषयभोगः पूजा, निद्रा समाधिः, चलनं परिक्रमा, वाक्यानि स्तोत्राणि तथा सर्वविधं कर्म शिवस्य आराधनम् अस्ति। इत्थं मानसिकी पूजा वर्णिता अस्ति अस्मिन् स्तोत्रे।



Scanned with CamScanner

**(३) वेदसारशिवस्तवः -**

शङ्कराचार्यविरचिते अस्मिन् स्तवने ११ पद्यानि सन्ति। शिवः सर्ववेदानां साररूपः अस्ति इति अस्मिन् स्तवने प्रतिपादितम्। दार्शनिकसिद्धान्तानां निरूपणेन सह सर्वमपि शिवमयं विद्यते इति भगवान् शङ्कराचार्यः अत्र वर्णितवान्।

**(४) शिवपञ्चाक्षरस्तोत्रम् -**

इदमपि शङ्कराचार्यविरचितम् अस्ति। एतस्मिन् स्तोत्रे प्रतिपद्यं क्रमेण न-म-शि-वा-य-वर्णानां नमस्कारेण सह ग्रन्थनम् अस्ति अतः इदं पञ्चाक्षरस्तोत्रम् उच्यते। इदमपि अतिप्रसिद्धम् अस्ति।

**(५) रुद्राष्टकम् -**

एतत् स्तोत्रं गोस्वामी तुलसीदासः रचितवान्। अत्र ८ पद्यानि सन्ति तथा नवमे पद्ये फलश्रुतिः अस्ति। भगवतः शिवस्य दार्शनिकं स्वरूपं तथा शारीरिकं वर्णनम् अपि अत्र अस्ति।

**(६) जयशङ्करस्तोत्रम् -**

भक्तः उपमन्युः सरसपदावल्या शिवस्य स्तुतिं कृतवान् सा जयशङ्करस्तोत्रम् इति नाम्ना प्रसिद्धा अस्ति। शिवस्य प्रसन्नतायै यमात् रक्षायै च उपमन्युः इदं स्तोत्रं कृतवान्। अस्मिन् स्तोत्रे २० पद्यानि सन्ति। करूणामयः उपमन्युः करूणाकरं शिवं स्तौति। शिवः मां कृपणं न पश्यति अतः किं करोमि ? रोदिमि वा रटनं करोमि ? इति भावपूर्णं स्तोत्रम् उपमन्युः कृतवान्।

**(७) निर्वाणषटकम् -**

षटकम् अर्थात् षट् श्लोकयुक्तं स्तोत्रम्। एतत् निर्वाणषटकं भगवान् शङ्कराचार्यः रचितवान् अस्ति। "अहं केवलं चिदानन्दरूपः शिवः अस्मि, अन्यत् सर्वं विकृतियुक्तम्, अहं



Scanned with CamScanner

शिवस्वरूपः" इति उदात्तभावनायुक्तं दार्शनिकम् एतत् स्तोत्रम् अस्ति। प्रतिश्लोकं दार्शनिकतत्त्वानां गूढं निरूपणम् अत्र अस्ति।

**(८) शिवमहिम्नःस्तोत्रम् -**

गन्धर्वराजः पुष्पदन्तः अस्य स्तोत्रस्य रचयिता अस्ति। स्वकीयमहिम्नः भ्रष्टः पुष्पदन्तः भगवतः शिवस्य स्तुतिं करोति। शिखरिणीच्छन्दसि निबद्धम् इदं स्तोत्रं भावप्रधानम् अस्त्येव, तेन सह अत्र दार्शनिकसिद्धान्तानामपि स्थाने स्थाने नियोगः वर्तते। अस्मिन् स्तोत्रे कति श्लोकाः सन्ति इति विषये मतान्तरम् अस्ति। सम्प्रति शिवमहिम्नःस्तोत्रे ४० पद्यानि प्राप्यन्ते किन्तु १६ शताब्द्यां मधुसुदनसरस्वती-महोदयेन ३२ पद्यानां टीका विरचिता। नर्मदेश्वरमहादेवस्य मन्दिरे अपि ३१ पद्यानि एव भित्तिकासु लिखितानि सन्ति। अतः प्रायः ३१ वा ३२ पद्यानि अस्मिन् स्तोत्रे स्युः इति अनुमीयते।

**१.३.३ देवीस्तोत्राणि -**

अन्यदेवानाम् इव देव्याः अपि प्रसिद्धानि कानिचन स्तोत्राणि सन्ति। मातृरूपेण संस्थिता देवी भक्तैः भावपूर्णपद्यैः स्तुता वर्तते। अत्र केषाञ्चित् देवीस्तोत्राणां परिचयः लिख्यते।

**(१) देव्यपराधक्षमापनस्तोत्रम् -**

"कुपुत्रो जायेत् क्वचिदपि कुमाता न भवति" इति पङ्क्त्या प्रसिद्धम् एतत् स्तोत्रं शङ्कराचार्येण विरचितमस्ति। एतस्मिन् स्तोत्रे द्वादश पद्यानि सन्ति। करूणापूर्णैः पद्यैः अत्र देव्याः क्षमायाचना कृता वर्तते।

**(२) भवान्यष्टकम् -**

"गतिस्त्वं गतिस्त्वं त्वमेका भवानि।" इत्यनया पङ्क्त्या प्रसिद्धं भवान्यष्टकं भगवान् शङ्कराचार्यः रचितवान् अस्ति। जीवः किमपि न जानाति, तस्य कृते संसारे



Scanned with CamScanner

कोऽपि सम्बन्धः नास्ति, विविधं कर्म करोति तथापि किमपि न जानाति, दोषान् करोति, अतः देवीं प्रति जीवः वदति यत् त्वम् एका एव गतिः असि, त्वया विना किमपि नास्ति इति भावः अस्ति।

**(३) कनकस्तवः (लक्ष्मीस्तवः) -**

भगवान् शङ्कराचार्यः एतत् स्तोत्रं रचितवान्। एतस्मिन् स्तोत्रे १६ पद्यानि सन्ति। भगवत्याः लक्ष्म्याः अत्र सुन्दरं वर्णनम् अस्ति। एतस्य स्तोत्रस्य गानेन भगवती लक्ष्मीः प्रसन्ना भवति तथा ऐश्वर्यं प्रयच्छति इति फलश्रुतौ कथितमस्ति।

**(४) अन्नपूर्णास्तोत्रम् -**

"भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी" इति पद्यभागेन अतिप्रसिद्धमिदं स्तोत्रम् अस्ति। देव्याः अन्नपूर्णास्वरूपायाः अत्र स्तुतिः अस्ति। एतत् स्तोत्रं शङ्करा-चार्यनिर्मितम् अस्ति तथा अत्र द्वादश श्लोकाः सन्ति।

**(५) अम्बाष्टकम् -**

अत्यन्तम् उद्धतपदैः समासैः च विरचितम् इदं स्तोत्रं शङ्कराचार्यस्य रचना अस्ति। अत्र अष्ट पद्यानि अश्वधाटीछन्दसि निबद्धानि सन्ति। एतस्य स्तोत्रस्य अर्थावगमाय अतीव पाण्डित्यम् आवश्यकम्।

**१.३.४ अन्यानि स्तोत्राणि -**

स्तोत्रेषु अधिकानि स्तोत्राणि प्रायः विष्णोः, शिवस्य, देव्याः च स्युः। तेषु अपि अतीव प्रसिद्धानां स्तोत्राणां परिचयः संक्षेपेण अत्र प्रदत्तः अस्ति। तदतिरिच्य अन्येषां देवानामपि कानिचन प्रसिद्धानि स्तोत्राणि सन्ति। तेषां परिचयः अत्र प्रदीयते।



Scanned with CamScanner

(१) गुर्वष्टकम् -

"गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततः किं ततः किं ततः किं ततः किम्" इति पद्यांशेन सुप्रसिद्धं गुर्वष्टकम् आदिशङ्कराचार्येण विरचितम् अस्ति। अष्ट-श्लोकेषु "गुरोरङ्घ्रिपद्मे" इति पङ्क्तिः अस्ति। अतः गुर्वष्टकम् इति नाम अस्ति। फलश्रुतेः अन्तिमः नवमः श्लोकः अस्ति। गुरौ निष्ठा सदैव भवेत् इति अस्य स्तोत्रस्य सारः अस्ति। सर्वविद्याः पठिताः किन्तु गुरौ निष्ठा न भवति तावत् पर्यन्तं विद्यायाः कोऽपि लाभः नास्ति इति शङ्कराचार्यः लिखितवान्।

(२) चर्पटपञ्जरिकास्तोत्रम् -

अस्य स्तोत्रस्य रचयिता भगवान् शङ्कराचार्यः वर्तते। स्तोत्रेस्मिन् १७ पद्यानि सन्ति। "भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते। प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।।" इति ध्रुवपदेन अतीव प्रसिद्धम् एतत् स्तोत्रं भक्तियुक्तं दार्शनिकं च अस्ति। संसारे सर्वम् अपि असारभूतम् अस्ति। केवलं भगवान् एव शाश्वतः अविनाशी अस्ति अतः तस्य नामसङ्कीर्तनमेव करणीयम् इति अस्य स्तोत्रस्य सारः अस्ति।

(३) गङ्गाष्टकम् -

गङ्गाष्टकम् इति नाम्ना एकं महर्षिवाल्मीकिविरचितं तथा द्वितीयं शङ्कराचार्यविरचितम् इति द्वे गङ्गाष्टके स्तः। भगवत्याः गङ्गायाः पावनत्वं माहात्म्यं च स्तोतुं द्वयोः स्तोत्रयोः रचना कृता अस्ति। वाल्मीकिविरचिते स्तोत्रे अष्ट श्लोकाः तथा फलश्रुतिः तथा शङ्कराचार्यविरचिते अष्ट श्लोकाः, द्वयोः श्लोकयोः च फलश्रुतिः अस्ति। तदतिरिच्य चतुर्दशश्लोकात्मकं गङ्गास्तोत्रम् अपि प्रसिद्धम् अस्ति। तस्य रचयिता अपि शङ्कराचार्यः अस्ति।



Scanned with CamScanner

(४) नर्मदाष्टकम् -

"त्वदीयपादपङ्कजं नमामि देवि नर्मदे!" इति पङ्क्त्या अत्यन्तं प्रसिद्धम् एतत् स्तोत्रम् आदिशङ्कराचार्यः रचितवान्। एतस्मिन् स्तोत्रे भगवत्याः नर्मदायाः माहात्म्यं वैभवं प्रभावं च शङ्कराचार्यः वर्णितवान् अस्ति। नर्मदाष्टकस्य पठनेन नर्कदर्शनं न भवति इति फलश्रुतौ लिखितम् अस्ति।

अनेन प्रकारेण अत्र केषाञ्चित् एव अतिप्रसिद्धानां स्तोत्राणां परिचयः लिखितः। एतानि स्तोत्राणि विहाय अन्यानि अपि प्रसिद्धानि स्तोत्राणि सन्ति किन्तु बहुप्रसिद्धानाम् एव परिचयः प्रस्तुतः।

### १.४ स्तोत्रसाहित्ये शिवमहिम्नःस्तोत्रस्य स्थानम् -

शिवमहिम्नःस्तोत्रं गन्धर्वराज-पुष्पदन्तेन विरचितम् अस्ति। शिवनिर्माल्यस्य उल्लङ्घनेन सः स्वप्रभावात् भ्रष्टः अभवत् अतः सः भगवतः शिवस्य स्तुतिं कृतवान् इति एकेन श्लोकेन ज्ञायते-

**"कुसुमदशननामा सर्वगन्धर्वराजः**
**शिशुशशिधरमौलेर्देवदेवस्य दासः।**
**स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्**
**स्तवनमिदकार्षीद्दिव्यदिव्यं महिम्नः।।"[14]**

एतत् स्तोत्रं पुष्पदन्तस्य दीनावस्थायां भावगर्भितवाक्यैः अन्तःकरणेन निर्गतम् अस्ति। पुष्पदन्तः शिवस्य स्तोत्रकरणे स्वस्य असामर्थ्यं प्रदर्शयति। "अनेन स्तोत्रेण केवलं वाणीं पवित्रां करोमि" इति भावः तस्य मनसि अस्ति -

---

[14] शि.म.३७



Scanned with CamScanner

**"मम त्वेतां वाणीं गुणकथनपुण्येन भवतः।**

**पुनामीत्यर्थेऽस्मिन् पुरमथन। बुद्धिर्व्यवसिता।।"[15]**

पुष्पदन्तः आत्मनः दीनभावं प्रकटीकरोति अतः एव अस्मिन् स्तोत्रे विविधानां शास्त्राणामपि उल्लेखः दृश्यते। भगवान् शङ्करः सर्वविद्यानां स्वामी अस्ति अतः पुष्पदन्तः विविधशास्त्राणां दृष्टान्तं पुरस्कृत्य शिवस्य स्तुतिं करोति। अनेन कारणेन एतस्य स्तोत्रस्य यथार्थं ज्ञानं प्राप्तुं सर्वशास्त्रेषु प्रवेशः नैपुण्यं च आवश्यकम् अस्ति। दर्शनानां वेदवेदाङ्गानां मार्गाः विविधाः भवन्तु नाम, सर्वैः लक्ष्यरूपेण तु शिवः एव लभ्यः अस्ति, यथा नदीनां प्रवाहः भिन्न-भिन्नमार्गेण समुद्रं प्रति एव गच्छति।

**"त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति**

**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।**

**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**

**नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।"[16]**

सामान्यदृष्ट्या कस्यापि विकारः श्लाघनीयः प्रशंसायोग्यः न भवति किन्तु भगवतः शिवस्य विकारस्तु सर्वथा प्रशंसनीयः एव भवति। सामान्यानां द्वे नेत्रे भवतः किन्तु शिवः त्रिनयनः अस्ति सः विकारः अपि स्तुतियोग्यः एव अस्ति। शिवस्य कण्ठे विषस्य यत् चिह्नम् अस्ति तत् तु भगवतः शिवस्य शोभाम् अभिवर्धते। अतः उक्तम्-

**"अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-**

**विधेयस्यासीद् यस्त्रिनयन विषं संहृतवतः।**

---

[15] तत्रैव-०३

[16] तत्रैव-०७

स कल्माषः कण्ठे तव न कुरुते न श्रियमहो

विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः।।"[17]

अलङ्कारदृष्ट्या अपि एतत् स्तोत्रम् अतीव मनोहरं विद्यते। अत्र अर्थान्तरन्यासः, उपमा, अनुप्रासः इत्यादयः अलङ्काराः एतत् स्तोत्रम् इतोऽपि रमणीयं सरसं च कुर्वन्ति। उपमाऽलङ्कारः यथा

- ❖ उपमाऽलङ्कारः = "नृणामेको गम्यस्त्वमसि पयसामर्णव इव"[18]
- ❖ अनुप्रासः = "अकाण्डब्रह्माण्ड"[19]
- ❖ अनुप्रासः= "भुवनभयभङ्गाव्यवसानिनः"[20]
- ❖ अर्थान्तरन्यासः = "न हि वशिषु पथ्यः परिभवः"[21]
- ❖ अर्थान्तरन्यासः = "न खलु परतन्त्राः प्रभुधियः"[22]
- ❖ रूपकम् = "निजमुदहरन्नेत्रकमलम्"[23]

इत्थम् अलङ्कारैः अलङ्कृतम् इदं स्तोत्रम् अस्ति। रूपकस्य अतिरमणीयम् उदाहरणम्-

"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो

रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।

दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-

र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः।।"[24]

---

[17] तत्रैव-१४

[18] तत्रैव-०७

[19] तत्रैव-१४

[20] तत्रैव-१४

[21] तत्रैव-१५

[22] तत्रैव-१८

[23] तत्रैव-१९

[24] तत्रैव-१८



Scanned with CamScanner

वेदवेदाङ्गदर्शनादिभिः शास्त्रैः सह अत्र पौराणिकानां कथानामपि सुन्दरः विनियोगः अस्ति। ब्रह्मा तथा विष्णुः शिवस्य ऐश्वर्यं ज्ञातुं वह्निस्तम्भस्य उपरि अधश्च गतवन्तौ किन्तु शिवस्य ऐश्वर्यं न ज्ञातम्। अतः ब्रह्मा तथा विष्णुः अपि शिवस्य स्तुतिं कृतवन्तौ। तेन शिवः प्रसन्नः भूत्वा स्वयमेव दर्शनं दत्तवान्।[25] रावणः एकवारं स्वस्य पराक्रमं दर्शयितुं कैलाशपर्वतम् उत्खातुं प्रयत्नं कृतवान् तदा भगवान् शिवः स्वस्य पादाङ्गुष्ठेन एव पर्वतं नोदितवान्। तेन रावणः पीडितः तथा क्षमायाचनापूर्वकं शिवस्य स्तुतिं कृतवान्।[26] बाणासुरस्य कथा,[27] समुद्रमन्थनस्य कथा,[28] कामदेवस्य दहन-प्रसङ्गः,[29] त्रिपुरदाहप्रसङ्गः,[30] दक्षस्य यज्ञविध्वंसप्रसङ्गः,[31] विष्णोः सहस्रकमल-पूजनस्य प्रसङ्गः,[32] इत्यादिभिः अनेकैः पौराणिकैः प्रसङ्गौः एतत् स्तोत्रं समलङ्कृतम् अस्ति।

स्तोत्रेऽस्मिन् विविधानां शास्त्राणां समाहारः, विविधानाम् अलङ्काराणां सुन्दरः विन्यासः तथा अनेकानां पौराणिककथानां विनियोगः अस्ति। एतत् सर्वम् एकस्मिन् स्थाने दुर्लभम् अस्ति किन्तु अस्मिन् स्तोत्रे प्राप्यते। तेन एव अस्य स्तोत्रस्य स्थानं स्तोत्रसाहित्ये अतीव उत्कृष्टं भवति। अस्य स्तोत्रस्य अनेकाः टीकाः अपि सन्ति। तासु प्रसिद्धा टीका मधुसूदनाचार्यस्य अस्ति। अन्याः अपि प्रकाशिताः अप्रकाशिताश्च टीकाः स्युः। तिस्रः अप्रकाशिताः टीकाः तु मम समीपे सन्ति। तासु एकस्याः उपरि संशोधनम् अस्मिन् लघुशोधनिबन्धे क्रियते। टीकाभिः अपि ज्ञायते यत् इदं शिवमहिम्नःस्तोत्रम् अतीव प्रसिद्धं महत्त्वपूर्णं च अस्ति तथा स्तोत्रसाहित्ये अस्य स्तोत्रस्य विशिष्टं स्थानम् अस्ति इति।

---

25 तत्रैव-१०

26 तत्रैव-११,१२

27 तत्रैव-१३

28 तत्रैव-१४

29 तत्रैव-१५

30 तत्रैव-१८

31 तत्रैव-२१

32 तत्रैव-१९



Scanned with CamScanner




Scanned with CamScanner

॥ श्रीजानकीवल्लभो विजयतेतराम् ॥

# कृष्णविरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च

## *An Edition and Critical Study of Kaivalyadīpikā with own Prabhā Commentary of Kṛṣṇa*

**वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य**

**विद्यावारिधिः (Ph.D.) इत्युपाधये शोधप्रबन्धः**

**A Thesis for the award of**
**Vidyavaridhi Degree (Doctor of Philosophy) of**
**Shree Somnath Sanskrit University, Veraval**


मार्गनिर्देष्टा/Guide

**साधुः श्रुतिप्रकाशदासः**

*निदेशकः -"आर्ष-अक्षरधाम", गांधीनगरम्*

**Sadhu Shrutiprakashdas**

*Director*

AARSH-Akshardham, Gandhinagar

अनुसन्धाता /Researcher

**जानकीशरणः**

*सहायकाचार्यः (दर्शनम्)*

**Janakisharan**

*Assistant Professor (Darshana)*

Shree Somnath Sanskrit University



**श्रीसोमनाथसंस्कृतयुनिवर्सिटी**

(गुजरातसर्वकारेण स्थापितः)

**Shree Somnath Sanskrit University**

(Established by Government of Gujarat)

वेरावलम्-३६२ २६६

**Veraval-362266**

**2015**

AKSHARDHAM CENTER FOR
APPLIED RESEARCH IN SOCIAL HARMONY

AARSH

POST GRADUATE RESEARCH & PUBLICATION CENTER,
AFFILIATED TO SOMNATH SANSKRIT UNIVERSITY, VERAVAL

SWAMINARAYAN
AKSHARDHAM
J Road, Sector 20,
Gandhinagar - 382 020
Tel : 079 2326 0001/2
Ext. : 152 to 155, 165
Fax : 079 2326 0336
email : akdvip@gmail.com
aarsh@mail.com
akshardham07@gamil.com

# प्रमाणपत्रम्

सानन्दं मार्गनिर्देशकत्वेन प्रमाणयामि यत् **श्री जानकीशरणः** इति नामधेयः शोधच्छात्रः मदीये मार्गदर्शने भृशं परिश्रम्य समुपलब्धां सामग्रीं च सङ्कलय्य **"कृष्णविरचितस्वोपज्ञ-प्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च"** ***(An Edition and Critical Study of Kaivalyadīpikā with own Prabhā Commentary of Kṛṣṇa)*** इति शीर्षकाङ्कितं मौलिकशोधप्रबन्धं वेरावलस्थ-श्रीसोमनाथ-संस्कृतविश्वविद्यालयस्य विद्यावारिधिः इत्युपाधये समर्पयतीति। मातृकाशास्त्रं पाठसम्पादनविधिञ्च समवलम्ब्य विश्वविद्यालयानुदानायोगस्य २००९ संवत्सरस्याधिनियमानुसारं सम्पादितोऽयं शोधप्रबन्धः विद्यावारिध्युपाधये सर्वथा समर्पणयोग्य इति धिया अमुं शोधप्रबन्धं विद्यावारिध्युपाधये संस्तौमि।

स्थानम् – गांधीनगरम्

दिनाङ्कः – १६।१०।१५

मार्गदर्शकः

साधुः श्रुतिप्रकाशदासः

# प्रतिज्ञापत्रम्

वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **विद्यावारिधिः (Ph.D.)** इत्युपाधये श्रीमतां **साधुश्रुतिप्रकाशदास**महोदयानां मार्गदर्शने **"कृष्णविरचितस्वोपज्ञप्रभाव्याख्या-सहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च"** ***(An Edition and Critical Study of Kaivalyadīpikā with own Prabhā Commentary of Kṛṣṇa)*** इति शीर्षकाङ्कितः शोधप्रबन्धोऽयं मार्गनिर्देशकस्य निर्देशानुसारं मातृकाशास्त्रं पाठसम्पादनविधिञ्च समवलम्ब्य विश्वविद्यालयानुदानायोगस्य २००९ संवत्सरस्याधिनियमानुसारं सज्जीकृत्य ऐदम्प्राथम्येन समर्प्यते इत्यहं प्रतिजाने। मौलिकशोधप्रबन्धस्यास्य अपेक्षिता सर्वाऽपि सामग्री मयैव सङ्कलितेति प्रमाणयामि।

दिनाङ्कः -

इत्थम्

स्थानम् - वेरावलम्

**(जानकीशरणः)**

अनुसन्धाता

**Shree Somnath Sanskrit University**
**(Estd. by Government of Gujarat)**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.shreesomnathsanskrituniversity.info

Ref No. SSSU/Ph.D./Certi./4453-4511/2014 Date: 13/02/2014

# CERTIFICATE

This is to certify that Mr. JANAKISHARAN is a student of Ph.D. Degree Course. His Ph.D. registration number and date are 100 & 02-02-2013. He has attended the Ph.D. Coursework organized by Shree Somnath Sanskrit University, Veraval (as per UGC Minimum Standards and Procedure for the award of Ph.D. Degree Regulation 2009) from 7th September, 2013 to 29th September, 2013. He has successfully completed this Ph.D. Coursework.

**REGISTRAR,**
**Shree Somnath Sanskrit University**
**Veraval, Dist. Junagadh (Gujarat)**

# मङ्गलम्

अपारकरुणासिन्धुं ज्ञानदं शिष्यवत्सलम्।

ध्वस्ताज्ञानप्रपञ्चकं शान्तं विज्ञानरूपिणम्॥

श्रीवैष्णवमताब्जं तं सच्छास्त्राणां प्रवर्तकम्।

रामप्रकाशमाचार्यम् अच्युताद्यं वयं नुमः॥

# उपोद्घातः

इह खलु जगति सत्स्वप्यनेकेषु शास्त्रेषु ब्रह्मविद्यापराख्यमध्यात्मशास्त्रमेव निःश्रेयससाधनतया श्रेष्ठं परमुपादेयञ्चेति श्रुतिस्मृतिभिश्चैकमत्येनोद्घुष्यते। "**अध्यात्मविद्या विद्यानाम्**" इति परम्परामनुसृत्य सर्वेऽपि ऋषयः ज्ञानिनश्च अध्यात्मज्ञानमेवाश्रयन्ते। "**सा विद्या या विमुक्तये**" इतीयमुक्तिः मोक्षपरकं शास्त्रमेवं प्रकृतविद्यात्वेन अभ्युपैति। सुभाषितेऽपि "**विद्या तु वैदुष्यमुपार्जयन्ती जागर्ति लोकद्वयसाधनाय**" इत्युक्तं भवति। अथ च वैशेषिकसूत्रं "**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**" इत्यनेन शास्त्राणां द्वैविध्यं सङ्केतयति। एवञ्च सति धर्मार्थकामानां त्रिविधानामुद्देश्यानां तत्सम्बद्धानां शास्त्राणाञ्च साधनत्वं मोक्षशास्त्रस्य च साध्यत्वं सम्पद्यते। अत एव मुण्डकोपनिषदि "**द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते**" इत्यध्यात्मशास्त्रस्यैव पराविद्यात्वेन निर्देशः कृतो वर्तते। यया विद्यया लौकिकं ज्ञानं जायते सा अपरा विद्या। यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा परा विद्या इत्युच्यते।

### अद्वैतसिद्धान्तविकासः—

अतिप्राचीनकाले सेयं परा ब्रह्मविद्या प्रथममुपनिषत्सु प्रतिष्ठिता। ततो महाभारतान्तर्गत-श्रीभगवन्मुखारविन्दात् निःसृतायां बादरायणशाण्डिल्यादिभिर्महर्षिभिर्मीमांसितार्थायां सर्वविषया-वगाहित्वेन ज्ञानविज्ञानसमन्विताध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिकायां श्रीमद्भगवद्-गीतायां तथा अन्येषु ग्रन्थेषु सङ्क्षेपतस्तत्सिद्धान्तरूपेण सङ्गृहीता। ततः करुणावरुणालयेन भगवता बादरायणेन शारीरकसूत्रापराभिधाने ब्रह्मसूत्रग्रन्थे मीमांसान्यायपद्धत्योपनिषद्गतजीव-ब्रह्मविषयकानेकवाक्यार्थविचारेण जीवब्रह्मैक्यसिद्धान्तः प्रस्थापितः। वेदान्ते प्रस्थानत्रयमङ्गी-क्रियते—(१) श्रुतिप्रस्थानम्, यथा उपनिषत्, (२) स्मृतिप्रस्थानम्, गीतादिकम्, (३) न्यायप्रस्थानम्, ब्रह्मसूत्रादिकम्। तत्र उपनिषत्सु ऋषीणां सत्यद्रष्टॄणां वा सत्योपलब्ध्यादिकं विधृतम्। गीतादौ

ऋषिभिः विधृतम् उपलब्ध्यादिकं भाषान्तरेण उपस्थापितम्। ब्रह्मसूत्रादौ तु श्रुतिस्मृतिवचनादिकं युक्तिसहायेन दृढीकृतम्।

भगवच्छङ्करपादात् प्राक् श्रीगौडपादाचार्यैः माण्डूक्योपनिषत्कारिकाः प्रणीताः। तदनु अद्वैतसिद्धान्तस्य विकासाय श्रीशङ्करचार्यैरुपनिषद्भगवद्गीताब्रह्मसूत्राणामुपरि भाष्याणि प्रणीतानि, यस्योपरि श्रीमत्सुरेश्वराचार्यैर्बृहदारण्यकादिभाष्योपरि बृहद्वार्तिकग्रन्थाः निर्मिताः। ततः श्रीपद्मपाद-वाचस्पतिमिश्र-आनन्दगिरि-विद्यारण्यादिभिः बहवो हि पञ्चपादिका-भामत्यादिग्रन्थाः प्रणीताः। अनन्तरमन्यैः शास्त्रविचक्षणैः वेदान्ताचार्यैः टीकानामुपरि टीका विरचिताः। अद्वैतसिद्धान्ते नैकैराचार्यैः परमतत्त्वबोधनाय नैके पाण्डित्यपूर्णग्रन्था उट्टङ्किताः। तेषूपनिषद्-गीता-सूत्र-भाष्य-वादप्रधान-अनुभवप्रधान-काव्यात्मकशैलीप्रधाना ग्रन्थास्सन्ति।

तदनु सूक्ष्मदर्शिनो वेदान्तशास्त्रविशारदा विरुद्धमतवादिनां शङ्कानिराकरणेन वेदान्तसिद्धान्तविशदीकरणाय वेदान्तग्रन्थेषु व्युत्पत्तिविकासाय तत्तत्काले स्वतन्त्रान् बहून् बृहतो ग्रन्थान् विरचयामासुः। तथा हि ब्रह्मसिद्धिः, नैष्कर्म्यसिद्धिः, सङ्क्षेपशारीरकम्, इष्टसिद्धिः, खण्डनखण्डखाद्यम्, न्यायमकरन्दः, पञ्चदशी, अद्वैतदीपिका, सिद्धान्तलेशसङ्ग्रहः, अद्वैतसिद्धिः इत्याद्याः। केचन अन्ये अत्रानुक्ता ग्रन्था अद्वैतसिद्धान्तविरोधिसाङ्ख्यनैयायिकमीमांसाबौद्धार्हतादि-पूर्वपक्षखण्डनात्मकत्वात् दुरूहतर्कजालजटिलप्रौढवाक्सरणिनिबद्धा विविधविवरणटीकोपटीकादि-परिष्कृता अद्य पण्डितमण्डलीलोचनगोचरा विद्योतन्ते।

एतेषाम् अद्वैतग्रन्थानां विषयदृष्ट्या त्रैविध्यं वक्तुं शक्यते। शारीरकभाष्यपञ्चपादिका-भामत्याद्याकरग्रन्थाः; नैष्कर्म्यसिद्धिः, खण्डनखण्डखाद्यम्, अद्वैतसिद्धिः, सिद्धान्तलेशसङ्ग्रहादि-वादप्रधाना ग्रन्थाः; पञ्चदशी, विवेकचूडामणि, उपदेशसाहस्र्यादि अनुभवप्रधाना ग्रन्था इति। एवमेव केचन लघुशरीरा अपि अतिगभीराशयाः प्रमाणमालाः, भेदधिक्कारः, तत्त्वविवेकः, तत्त्वानुसन्धानम्, अद्वैतरत्नरक्षणम्, अद्वैतचिन्तामणिः, स्वाराज्यासिद्धिः इत्यादयः शतशो ग्रन्था विद्वद्भिः प्रणीता उपलभ्यन्ते। परमेतेषां ग्रन्थानाम् अर्थावगमनाय सुलभतया चावबोधायान्येऽपि प्रकरणग्रन्था विरचिताः सन्तः उपकुर्वन्ति। ते च प्रकरणग्रन्थाः सिद्धान्तमात्रप्रदर्शनपराः, खण्डनमण्डनपराः अनुभवात्मकभावाविष्करणपराः, काव्यशैल्या सिद्धान्तप्रदर्शनपराश्चेति चतुर्धा

विभक्तुं शक्यन्ते। एते सर्वेऽपि ग्रन्थाः "**शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्। आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः**" इति लक्षणलक्षितास्सन्तः शास्त्रस्यैव कार्यसाधका वर्तन्ते।

तथैव कालदृष्ट्याऽपि सर्वदर्शनोत्तमाद्वैतवेदान्तदर्शनस्य विकासकालः प्राचीन-मध्यम-आधुनिकभेदेन त्रिधा प्रविभक्तुं शक्यते। दशमशतकान्तः प्राचीनभागो यस्मिन् काले शाङ्करभाष्यं तद्व्याख्यानभूतानां ग्रन्थानामाविष्करणम्, भामतीप्रस्थानस्य विवरणप्रस्थानस्य च बीजावापः, संख्येयानां स्वतन्त्रग्रन्थानाञ्च आविर्भावोऽभवत्। मध्यमो भागः षोडशशतकान्तो यत्र न्यायशैल्या निबद्धा न्यायवैशेषिकादिमतसिद्धभेदवादखण्डनपराः स्वतन्त्रभूता अद्वैतग्रन्थाः प्रादुरभुवन्। आधुनिककालः अद्यावधिपर्यन्तः स्वीकर्तुं शक्यते।

## प्रकृतशोधकर्मणि प्रवृत्तिः—

२०१२ तमे वर्षे शृङ्गेरिस्थ-राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धिपरिसरे अद्वैतवेदान्ते सस्वर्णपदकमाचार्यपदवीमवाप्य वेदान्तशास्त्रे मातृकाग्रन्थे शोधकार्यस्य सम्पिपादयिषया गुरुणा प्रेरितस्सन् अहं विभिन्नहस्तप्रतिसङ्ग्रहालयान् अगमम्। तत्र तावत् मद्रासनगरस्थ-अड्यारहस्त-प्रतिसङ्ग्रहालये अद्वैतवेदान्तसम्बन्धा मातृकाः पर्यशीलम्। तत्राऽहं चिकीर्षितशोधकार्यार्थं द्वौ मातृकाग्रन्थौ अलभे। तत्र वाचस्पतिमिश्रकृतभामतीव्याख्यानस्य अच्युतकृष्णानन्दतीर्थकृता (१६५०-१७५० A.D.) "भावदीपिका" इत्याख्या एका मातृका, अपरा च कृष्णविरचिता (१८०० A.D.) सव्याख्या कैवल्यदीपिका। तत्र कल्पतरुपरिमलसङ्ग्रहरूपा भावदीपिका अड्यारहस्तप्रति-सङ्ग्रहालये त्रिषु भागेषूपलभ्यते। तेषु (१) 39.E.9 इति ग्रन्थक्रमाङ्काङ्किता देवनागरीलिपौ अपूर्णा अक्षरभङ्गयुता चतुस्सूत्रीपर्यन्ता। (२) 30.A.12 इति ग्रन्थक्रमाङ्कनिर्दिष्टा ग्रन्थलिपौ अतिप्राचीना, जीर्णा, अक्षरभग्ना च सती द्वितीय-तृतीय-तुरीयाध्यायपर्यन्ता उपलभ्यते। (३) 39.E.10 इति ग्रन्थक्रमाङ्कसूचिता देवनागरीलिपौ खण्डद्वये भामतीव्याख्यानस्य द्वितीय-तृतीयाध्यायुता प्राप्यते। अत्र प्रथमतृतीयक्रमाङ्के निर्दिष्टं मातृकाद्वयमपि द्वितीयक्रमाङ्के सूचिताया ग्रन्थलिपिमातृकायाः प्रतिकृतिः (Transcript Copy) वर्तते। अस्या मातृकायाः स्थिरचित्रं (Camera copy) स्वीकृत्य किञ्चिदध्ययनमहमकार्षम्। किन्तु शोधकार्यस्य अल्पावधित्वात् १०११ पुटात्मिकेयं मातृका सम्प्रति विद्यावारिधिकालावधौ कदाचित् सम्पादयितुं न शक्यते। भगवदनुग्रहेण अस्याः सम्पादनं प्रकाशनञ्च भविष्यत्काले भविष्यति इति धियाऽहं

कृष्णविरचितसव्याख्यायाः कैवल्यदीपिकायाः सम्पादने प्रावृत्ते। अस्या मातृकाया एकां प्रतिलिपिं (xerox) अहम् अड्यारहस्तप्रतिग्रन्थालयात् ऑगस्ट् २०१२ तमे वर्षे प्राप्तवान्। तदनु शोधकार्यमिदमारभत।

## अद्वैतवेदान्तसाहित्ये कैवल्यदीपिका —

अद्वैतवेदान्तनिबन्धेषु बहवो हि निबन्धाः काशी-पुण्यपत्तन-मद्रास-मुम्बापुरादिनगरेषु विद्वरेण्यैः संशोधनपुरःसरं प्राकाश्यं नीत्वा महानुपकारः कृतः। तथापि नैकासु लिपिषु विरचिता एते ग्रन्थाः प्रकाशिता अप्रकाशिताश्च वर्तन्ते। तत्र ग्रन्थ-तमिल-तेलुगु-कन्नड-शारदा-देवनागरीप्रभृतिषु नैकासु बहवो हि ग्रन्था येऽमुद्रितास्सन्तो विभिन्नेषु प्राच्यविद्याग्रन्थालयेषूपलभ्यन्ते। अमीषु ग्रन्थेषु उपलभ्यन्ते नैके वेदान्तविषया ये मुमुक्षूणां कृते नितरामुपयोगिनस्सन्ति। अतीव सरलया रीत्या विविधदृष्टान्तपुरस्सरं, विभिन्नमतसिद्धान्तोपवर्णनपूर्वकमद्वैतमतस्य श्रेष्ठ्यमुपादेयत्वं च वर्णयन्त इमे न्यायप्रमाणोपबृंहिताः प्रकरणग्रन्थाः शास्त्रप्रमेयं स्फुटं प्रबोधयन्ति।

तादृशनिबन्धेष्वेकमिदं ग्रन्थरत्नं "कैवल्यदीपिका" नाम यदद्यावध्यप्रकाशितं निगूढमिवासीत्। इयं "कैवल्यदीपिका" वेदान्तसिद्धान्तार्थजिज्ञासून् नितरामुपकरोति। इयं स्वोपज्ञप्रभाव्याख्यायुता कैवल्यदीपिका कृष्णविरचितेति ग्रन्थस्य पुष्पिकावाक्येन (Colophon) स्फुटीभवति। अन्येषां प्राचीनग्रन्थकर्तॄणामिवैतेषामपि देशकालजीवनवृत्तादिविषये सम्यक् परिचयो न प्राप्यते। अतो ग्रन्थान्तरावलोकनेन सङ्कलितं यत्किञ्चिद्वृत्तमत्रोपन्यस्यते।

अयं कृष्णपण्डितः ब्रह्मानन्दापराभिधानकृष्णानन्दयतेश्शिष्यो दक्षिणदेशीयस्तमिलभाषा-साहित्ये च निष्णातश्चोलदेशवासीति अद्वैतवेदान्तसाहित्येतिहासकोशकारः र.तङ्गस्वामि-शर्ममहोदयः मनुते। मातृकाया द्वयोः प्रकरणयोः आरम्भे अन्ते च "**श्रीमद्गुरुब्रह्मानन्दस्वामिने नमः**" इत्यनेन वाक्येन ज्ञायते यदस्य गुरोर्नाम ब्रह्मानन्दः। ग्रन्थस्यान्तेऽपि अयं ग्रन्थकारः स्वगुरुं नमस्कृत्य स्वकृतार्थतां प्रदर्शयति। तत्रायं स्पष्टं सङ्केतयति यदस्य गुरोर्नाम ब्रह्मानन्द इति वर्तते। यथा- "**ब्रह्मानन्दाद्यतीन्द्रादपि विपुलकृपां प्राप्य मुक्तो धरण्याम्**" इति। अस्यैव मातृकायाः स्वोपज्ञप्रभाव्याख्यायाम् अयम् ब्रूते यदस्य गुरुः यतीन्द्रो ब्रह्मानन्दः अन्वर्थनामा वर्तते। ब्रह्मानन्दस्य अपरं नाम कृष्णानन्दयतिः इत्यस्ति। अस्य ग्रन्थकारस्य वंशविषये साक्षात् प्रमाणं विवरणञ्च नोपलभ्यते तथापि ग्रन्थकारेण प्रणीतासु कृतिषु एतद्विषये ईषन्निर्देशः प्राप्यते। तद्यथा अनेन कृष्णेन

विरचितायाः “मुनिभावप्रकाशिका” इति भगवद्गीताव्याख्याया आद्येषु पद्येषु एष सङ्केतयति यत् स भारद्वाजगोत्रीयनृसिंहगुरोः पुत्रः, श्रीरामदेशिकस्य भागिनेयः च। स्वीयमातुलाद् व्याकरणमीमांसा-वेदान्ताद्यनेकशास्त्राणामध्ययनं चकार।

अस्या मातृकायाः कर्तुः कालविषयेऽपि स्पष्टं विवरणं नोपलभ्यते। मातृकाग्रन्थोऽयं तमिलभाषायां ताण्डवरायस्वामिना विरचितस्य कैवल्यनवनीतस्य संस्कृतीकरणरूपः पद्यबद्धोऽस्तीति केचन मन्वते। मतमेतत् प्रामाणिकमप्यस्ति। अयं ताण्डवरायस्वामी सप्तदश-अष्टादशशतकीयः चोलदेशीयो नन्निलग्रामवासिनारायणसरस्वतीशिष्यः आसीदिति केचन वदन्ति। केचित्तु ताण्डवरायस्वामिनं तिरुवानैक्कावलगोपालशास्त्रिणः प्राप्तविद्यम्, नारायणगुरोः प्राप्तदीक्षम्, परमशिवेन्द्रशिष्यं सदाशिवब्रह्मेन्द्रसतीर्थ्यञ्चेति भणन्ति। ताण्डवरायस्वामिना तमिलभाषया निबद्धं “कैवल्यनवनीतम्” तमिलप्रदेशे अद्वैतीनां मध्ये अतीव प्रसिद्धं वर्तते। अस्य कैवल्यनवनीतस्य कासुचित् भाषासु अनुवादो विद्वद्भिः कृतः। तत्र Dr. Karl Graul (१८१४-१८६४ A.D.) इति नामकेन जर्मनदेशस्थविदुषा कैवल्यनवनीतस्य जर्मनभाषायाम् Bibliotheca Tamulica seu Opera Praecipua Tamuliensium (1854-1865 A.D.) इति शीर्षाङ्किते ग्रन्थसङ्ग्रहे अनुवादः कृतः। मलयालमभाषायामस्यानुवादः Acharya Thunjathe Ezuththachchan नामकेन विदुषा “प्रबोधामृतम्” इति शीर्षाङ्कितग्रन्थे कृतः। कैवल्यनवनीतस्य समग्रोऽपि संस्कृतानुवादः कृष्णपण्डितेन “कैवल्यदीपिका” इति शीर्षकाङ्कितग्रन्थे पद्येषु निबद्धः। संस्कृतानुवादेन साकमनेन कृष्णेन कैवल्यदीपिकायाः उपरि “प्रभा” इत्याख्या स्वोपज्ञव्याख्यापि कृता।

अतः सर्वथापि तमिलकविताण्डवरायस्वामिनः अर्वाचीनोऽयं कैवल्यदीपिकाकारः कृष्णपण्डितः अष्टादशशतकीयः (१८०० A.D.) इति कल्पयितुं शक्यते। अनेन कल्पनेन ग्रन्थकारस्यास्य समयो विक्रमादित्यवर्षस्याष्टादशशताब्द्या मध्यमभाग इति निर्धारितो भवति। ग्रन्थोऽयं गुरुशिष्ययोः संवादरूपेण निबद्धः सन् प्रस्थानत्रयम् आलोडयित्वा वेदान्तस्य सारं प्रकटयति। प्रकरणग्रन्थरूपेण इयं कैवल्यदीपिका प्रायः सर्वानपि वेदान्तसिद्धान्तान् विवृणोति। अतः मया कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च श्रीसोमनाथसंस्कृतविश्वविद्यालये विद्यावारिधीत्युपाधये शोधकार्यत्वेन स्वीकृतम्। अद्वैतवेदान्ते ईदृशं ग्रन्थरत्नमद्यावधि अप्रकाशितमासीत्। अतस्तस्याविष्करणमेव शोधप्रबन्धस्यास्य मुख्यमुद्देश्यम्।

अस्याः कैवल्यदीपिकायाः हस्तप्रतिद्वयं मद्रासनगरस्थ-अड्यारहस्तप्रतिसङ्ग्रहालये उपलभ्यते। तत्र हस्तलिखितपुस्तकमेकं ग्रन्थलिपौ निबद्धं वर्तते किन्तु तद् अतिजीर्णम् अपूर्णञ्च अस्ति। अपरा एका सुवाच्या पूर्णा च हस्तप्रतिकृतिः देवनागर्यां वर्तते या अष्टात्रिंशदधिकपञ्चशतपृष्ठपरिमाणा (५३८) वर्तते। अस्याः विद्यमानमातृकायाः मूलमातृका तु मदुरानगरवास्तव्यः श्रीमतः एम्.आर्. सुन्दररमणशास्त्रिवर्यस्य सविधे आसीत्, यां मातृकामाधारीकृत्य अड्यारग्रन्थालस्य पण्डिताभ्यां श्रीरामनाथशास्त्री, टि.आर्. शेषाद्रिशर्मा च इत्येताभ्यां कर्गजमातृका परिलिखिता। अस्या मातृकायाः लेखनकार्यं १९१५ ख्रीष्टाब्दे दिसम्बरमासे २९ दिनाङ्के सम्पूर्णतामुपगतम्। ततः १९१६ ख्रीष्टाब्दे जनवरीमासे अष्टमे दिनाङ्के मातृकेयम् अड्यारहस्तप्रतिसङ्ग्रहालयाय समर्पिता।

## अधिकृतस्य शोधविषयस्य विशेषता

शोधकर्त्राधिकृतस्य विषयस्य विशेषतेयमेवस्ति यदद्यावधि प्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः सम्पादनं प्रकाशनञ्च नाभूत्। ग्रन्थरत्नमिदमद्यावधि हस्तप्रतिपुस्तकाल-येष्वासीत्। अतोऽत्र मामके शोधप्रबन्धे कैवल्यदीपिकायाः प्रभाव्याख्यासहितायाः सम्पादनं विधाय समालोचनात्मकम् अध्ययनं प्रस्तूयते। अपि च कृष्णपण्डितवर्यैः अद्वैतवेदान्तस्य प्रकरणग्रन्थेऽस्मिन् येषामविषयाणां वर्णनमकारि, तेषामौचित्यमस्त्युत नेत्येवम्प्रकारेणात्र शोधविषये चिन्तनं वर्तिष्यते।

## अधिकृतानुसन्धानविषयस्यावश्यकता

प्रकृतशोधकर्मण आवश्यकतेयमेव यद् एतादृशङ्कार्यं विषयेऽस्मिन् अद्यावधि नाभूदिति निश्चप्रचम्। अतः आवश्यकता तु वर्तत एव। अपि च अद्वैतवेदान्तजिज्ञासवो बाहुल्येन न जानन्ति यदयं कृष्णपण्डितः क आसीत्, अनेन प्रणीतोऽयं ग्रन्थोऽद्वैतवेदान्ते किं स्थानं बिभर्तीति। अतः तादृशञ्ज्ञानममीभ्यो भूयादित्येतादृशी आवश्यकता वरिवर्त्ति। असौ चात्र विषयग्रहणे कारणमिति।

## अधिकृतानुसन्धानविषयस्य परिणामः

मच्छोधविषयस्य परिणामस्तु नितरामुपकारी भविष्यति। प्रकृतानुसन्धानकर्मणा अद्वैत-वेदान्तदर्शने कश्चिन्नूतनो ग्रन्थो विदुषां जिज्ञासूनाञ्च दृष्टिपथि समागमिष्यति। तथा चेदमप्यमीषाङ्कृते सुलभाय भविष्यति बोद्धुं यत् कृष्णपण्डितवर्यस्य कालः कः? कस्तद्ग्रन्थः?

कदा च लिलेखेति। किञ्च एतस्य समीक्षात्मकसम्पादनानन्तरम् अस्मिन् विषये व्याकरणकाव्यादि-दृष्ट्यापि अनुसन्धानस्य द्वारमुद्घाटितं भविष्यतीत्थम्परिणामो भविष्यति।

## अधिकृतानुसन्धानविषयस्याध्यायपुरस्सरं रूपरेखा –

"**कृष्णविरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च**" इति शीर्षकोपेतः मच्छोधप्रबन्धोऽयं सपरिशिष्टं चतुर्भिरध्यायैः प्रविभक्तः। वेदान्ते चतुर्थसङ्ख्याया महान् महिमा वर्तते। यथा सकलज्ञानराशिवेदाः चत्वारः सन्ति। ब्रह्म चतुष्पाद् वर्तते। ब्रह्मसूत्रेषु चत्वारोऽध्यायाः सन्ति, तत्रापि प्रत्येकस्मिन्नध्याये चत्वारः पादाः। ब्रह्मजिज्ञासा स्वस्मात् पूर्वं नियमेन स्थितं यदपेक्षते तानि साधनान्यपि चत्वारि सन्ति। ग्रन्थे अनुबन्धा अपि चत्वारो भवन्ति। एवञ्च तमेव महाजनपथमनुकुर्वन् मयापि शोधप्रबन्धोऽयं चतुर्ष्वध्यायेषु प्रविभक्तः।

तत्रादौ शोधप्रबन्धेऽस्मिन् उपोद्घातभागे सम्पाद्यमानस्य ग्रन्थस्य भूमिकारूपेण किञ्चित्प्रास्ताविकरूपेण च केचनांशाः चर्चिताः। यत्र अद्वैतवेदान्तस्य सामान्यांशान् विवर्ण्य तदनु काचिदनुसन्धानभूमिका उपस्थापिता। तदनु "**कृष्णः – तद्देशकालकृतिवैदुष्यादीनां विचारः**" इत्याख्ये प्रथमेऽध्याये कैवल्यदीपिकाकारस्य देशकालादिपरिचितिः, ग्रन्थाभिधानम्, ग्रन्थविषयः, प्राप्तमातृकयोर्विवरणं गुणदोषविचारश्च, भाषाच्छन्दोव्यवस्था, ग्रन्थकर्तुः वैशिष्ट्यं शैली च इत्येतान् विषयानधिकृत्य उपस्थापनं कृतम्। तदनु उपलब्धमातृकयोः विवरणं गुणदोषविचारश्च, स्वीकृतमातृकायाः सम्पादनपद्धतिः, पाठसम्पादनविधिश्च विलिख्य मातृकयोः छायाचित्राणि योजितानि। "**स्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्**" इत्याख्ये द्वितीयेऽध्याये सम्पादितः स्वोपज्ञव्याख्यासहितकैवल्यदीपिकाग्रन्थभागः निबद्धः। "**कैवल्यदीपिकायाः तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्**" इत्याख्ये तृतीयेऽध्याये तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनं कृतम्। यत्र मङ्गलाचरणम्, अनुबन्धचतुष्टयम्, ब्रह्मणः स्वरूपतटस्थलक्षणे, साधनचतुष्टयम्, अध्यासः, जीवात्मनोः स्वरूपम्, अविद्या, चिच्चातुर्विध्यम्, लक्षणा, समाधिः, जीवन्मुक्तिः विदेहमुक्तिश्च इति अद्वैतसिद्धान्तानां भामतीविवरणप्रस्थानेन सह सिद्धान्तान्तरैः तौलनिकमध्ययनं विधाय समीक्षा कृता वर्तते। शोधप्रबन्धस्य "**कैवल्यदीपिकायाः संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणाम्**

**समीक्षितमध्ययनम्**” इत्याख्ये चतुर्थेऽध्याये अद्वैतसिद्धान्तानां विषये यत्र संशया वर्तन्ते, तेषां विषयाणामत्र प्रश्नोत्तरशैल्या समाधानं वर्तते। तत्र ब्रह्मणः अवाङ्मनसगोचरत्वम्, वेदानाम् अपौरुषेयत्वम्, अन्तःकरणस्य वृत्तिविचारः विद्वदविद्वत्कर्मफलवैषम्यम्, प्रतिबिम्बवादः, ज्ञानकर्मसमुच्चयनिराकरणम्, श्रुतिवाक्यानां विरोधपरिहारः, यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः, विधिविचारः, मायास्वरूपवर्णनम्, प्रतिबिम्बसत्यताविचारः, आत्मनः अखण्डार्थत्वम्, आनन्द-मीमांसा, अज्ञानभूसप्तकम्, ज्ञानभूसप्तकम्, चतुर्विधः संन्यासः, जीवन्मुक्तिः इत्यादिविषयाणां समीक्षितमध्ययनं विहितम्। तदनु उपसंहारे शोधप्रबन्धस्यास्य समग्रः सारः नरटङ्कि। परिशिष्टभागे कैवल्यदीपिकायाः साधारणश्लोकसूची, प्रयुक्तानां छन्दसां सूची, उदाहृतानां ग्रन्थानां सूची, प्रभाव्याख्यायाम् उदाहृतानां श्लोकानां श्रुतिस्मृतिवाक्यानाञ्च सूची, उल्लिखितानां न्यायानां सूची, परिशीलितग्रन्थसूची च विद्यते।

एवञ्च शोधप्रबन्धेऽस्मिन् प्रभाव्याख्योपेता कैवल्यदीपिका सम्पादिता वर्तते। तथा च परामृष्टानां ग्रन्थानां, तत्कर्तॄणां तत्सङ्केतानां च सूची, विषयानुक्रमणिका, अस्मदङ्गीकृतपाठानां सूचिकापादटिप्पणी, पाठविमर्शनरूपा टिप्पणी, ग्रन्थगतपद्यानाम् आद्यपादानुक्रमणिका चेति अपेक्षिताः अनुक्रमणिकाश्च यथास्थानं समावेशिताः सन्ति। शोधप्रबन्धोऽयं वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यावारिधिः इत्युपाधये श्रीमतां साधुश्रुतिप्रकाशदास-महाराजानां मार्गदर्शने विरचितः।

# विषयसूची


| विषयः | पृष्ठसङ्ख्या |
|---|---|
| ○ प्रमाणपत्रम् | i |
| ○ प्रतिज्ञापत्रम् | ii |
| ○ विद्यावारिध्यनुसन्धानकार्यशालायाः प्रमाणपत्रम् | iii |
| ○ मङ्गलाचरणम् | iv |
| ○ उपोद्घातः | v |
| ○ धन्यताविष्कृतिः | xiii |
| ○ विषयसूची | xvi |
| ○ सङ्केताक्षरसूची | xx |
| **प्रथमोऽध्यायः – कृष्णः – तद्देशकालकृतिवैदुष्यादीनां विचारः** | **१-४५** |
| १.१ किञ्चित् प्रास्ताविकम् | १ |
| १.१.१ अद्वैतविकासः | १ |
| १.१.२ श्रुतिप्रस्थानम् | २ |
| १.१.३ स्मृतिप्रस्थानम् | ३ |
| १.१.४ न्यायप्रस्थानम् | ४ |
| १.१.५ अद्वैतसिद्धान्तविकासः | ५ |
| १.१.६ अद्वैतवेदान्ते प्रकरणग्रन्थाः | १२ |
| १.१.७ अद्वैतवेदान्तवाङ्मये कृष्णकृतकैवल्यदीपिका | १२ |
| १.२ कृष्णः कः? | १३ |
| १.३ कृष्णस्य देशः | १६ |
| १.४ कृष्णस्य कालः | १७ |
| १.५ कृष्णस्य कृतयः | १८ |
| १.६ कृष्णस्य वैदुष्यम् | १९ |
| १.७ कृष्णस्य गुरुपदनिष्ठा | २० |
| १.८ कृष्णस्य कवित्वम् | २१ |
| १.९ कैवल्यदीपिकायाः परिचितिः | २२ |
| १.९.१ ग्रन्थाभिधानम् | २२ |
| १.९.२ ग्रन्थविषयः | २४ |
| १.९.२.१ प्रथमप्रकरणम् | २५ |
| १.९.२.२ द्वितीयप्रकरणम् | २६ |
| १.९.३ उपलब्धमातृकयोः विवरणम् | २७ |
| १.९.४ उपलब्धमातृकयोः गुणदोषविचारः | २९ |

१.९.४.१ ग्रन्थलिपिमातृका ३०
१.९.४.१ देवनागरीलिपिमातृका ३१
१.९.५ भाषाच्छन्दोव्यवस्था ३२
१.१० उपलब्धमातृकयोः चित्राणि ४४
१.१०.१ ग्रन्थलिपिमातृकायाः चित्राणि ४४
१.१०.२ देवनागरीलिपिमातृकायाः चित्राणि ४५

**द्वितीयोऽध्यायः – स्वोपज्ञव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसमीक्षात्मकं सम्पादनम्** **४६-२२९**

२.१ मातृकासम्पादनपद्धतिः ४६
२.२ पाठसम्पादनविधिः ५१
२.३ समीक्षितपाठयुता सव्याख्या कैवल्यदीपिका ५२

**तृतीयोऽध्यायः – कैवल्यदीपिकायाः तत्त्वप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्** **२३०-३००**

३.१ मङ्गलाचरणम् २३०
३.२ ग्रन्थरचनाप्रयोजनम् २३१
३.३ अनुबन्धचतुष्टयम् २३२
३.४ सगुणब्रह्मणो वाग्गोचरत्वम् २३४
३.५ ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणञ्च २३४
३.५.१ स्वरूपलक्षणम् २३५
३.५.२ तटस्थलक्षणम् २३७
३.६ सगुणनिर्गुणब्रह्मणोरभेदः २३८
३.७ साधनचतुष्टयम् २४०
३.७.१ नित्यानित्यवस्तुविवेकः २४१
३.७.२ इहामुत्रार्थफलभोगविरागः २४३
३.७.३ शमादिषट्कसम्पत्तिः २४५
३.७.४ मुमुक्षुत्वम् २४९
३.८ गुरूपसदनम् २५०
३.९ अध्यारोपापवादौ २५२
३.१० लक्षणा २५५
३.१०.१ जहल्लक्षणा २५६
३.१०.२ अजहल्लक्षणा २५७
३.१०.३ जहदजहल्लक्षणा २५७
३.११ अध्यासः २५८

३.११.१ अध्यासलक्षणम् २५९
३.११.२ अध्यासनिमित्तम् २६१
३.१२ अविद्या २६९
३.१२.१ अविद्याविषयः २६६
३.१२.२ अविद्याऽऽश्रयः २६७
३.१२.३ आवरणशक्तिः २६९
३.१२.४ विक्षेपशक्तिः २६९
३.१२.५ समष्ट्यज्ञानं व्यष्ट्यज्ञानञ्च २७०
३.१२.५.१ ईश्वरः प्राज्ञश्च २७१
३.१२.५.२ हिरण्यगर्भः तैजसश्च २७२
३.१२.५.३ विराट् विश्वश्च २७३
३.१३ सृष्टिक्रमः २७५
३.१३.१ पञ्चीकरणम् २७६
३.१४ जीवात्मनोः स्वरूपम् २७८
३.१५ चिच्चातुर्विध्यम् २८०
३.१६ साक्षी २८१
३.१७ ज्ञानस्य अन्तरङ्गसाधनानि २८६
३.१८ मुक्तिः २९१
३.१८.१ जीवन्मुक्तिः २९४
३.१८.२ जीवन्मुक्तानां लक्षणानि २९६
३.१८.३ विदेहमुक्तिः २९९

**चतुर्थोऽध्यायः – कैवल्यदीपिकायाः संशयच्छेदप्रदीपप्रकरणस्थानां विषयाणां समीक्षितमध्ययनम्** **३०१-४१७**

४.१ नामरूपादिविवर्जितं निर्विशेषं ब्रह्म ३०१
४.२ वेदानामपौरुषेयत्वम् ३०६
४.२.१ श्रुतिवाक्यानां विरोधपरिहारः ३११
४.३ विधिविचारः ३१५
४.४ मायास्वरूपवर्णनम् ३२३
४.५ सृष्टिविचारः ३३४
४.५.१ सृष्टिवाक्यानां तात्पर्यम ३३५
४.५.२ चतुर्विधः कल्पः ३३८
४.५.२.१ नित्यः प्रलयः ३३९
४.५.२.२ नैमित्तिकः प्रलयः ३४०
४.५.२.३ प्राकृतिकः प्रलयः ३४१

४.५.२.४ आत्यन्तिकः प्रलयः ३४३
४.६ ज्ञानस्य द्वैविध्यम् ३४४
४.७ ज्ञानभूमिकाः ३५०
४.७.१ अज्ञानभूसप्तकम् ३५१
४.७.२ ज्ञानभूसप्तकम् ३५४
४.८ अन्तःकरणवृत्तिविचारः ३६०
४.८.१ अन्तःकरणवृत्तेः प्रयोजनम् ३६२
४.८.२ ब्रह्मविषयिणी वृत्तिः ३६५
४.९ ज्ञानकर्मसमुच्च्यनिराकरणम् ३६७
४.९.१ यज्ञादिकर्मणां ब्रह्मविचारे उपयोगः ३७३
४.९.२ त्रिविधं कर्म ३७६
४.९.३ विद्वदविद्वत्कर्मफलवैषम्यम् ३७७
४.१० वैराग्यम् ३७८
४.११ संन्यासः ३८२
४.१२ अद्वैतसिद्धान्ते आत्मस्वरूपम् ३८९
४.१२.१ प्रतिबिम्बवादः ३९०
४.१३ आत्मनः अखण्डार्थत्वम् ३९६
४.१३.१ अखण्डार्थलक्षणम् ३९७
४.१३.२ सामानाधिकरण्यम् ४०३
४.१३.३ विशेषणविशेष्यभावसम्बन्धः ४०३
४.१३.४ लक्ष्यलक्षणभावसम्बन्धः ४०४
४.१४ आनन्दमीमांसा ४०६
४.१५ ग्रन्थस्यास्य फलश्रुतिः ४१५

**उपसंहृतिः** **४१८-४२०**
**परिशिष्टम्** **४२१-४७२**
- कैवल्यदीपिकायाः साधारणश्लोकसूची ४२१
- कैवल्यदीपिकायां प्रयुक्तानां छन्दसां सूची ४३२
- कैवल्यदीपिकायाम् उदाहृतानां ग्रन्थानां सूची ४३५
- कैवल्यदीपिकायाम् उद्धृतानां ग्रन्थकर्तॄणां नामानि सञ्ज्ञापदानि च ४३६
- कैवल्यदीपिकायाम् उद्धृतानां श्रुतिवाक्यादिश्लोकानां सूची ४३८
- कैवल्यदीपिकायाम् उल्लिखितानां न्यायानां सूची ४५२
- परिशीलितग्रन्थसूची ४५३
- राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनस्य प्रमाणपत्रे ४५९
- ISSN मूल्याङ्कितायां शोधपत्रिकायां प्रकाशितौ शोधलेखौ ४६१

# सङ्केताक्षरसूची

| | |
|---|---|
| अ.उ. | अन्नपूर्णोपनिषत् |
| अ.उप. | अध्यात्मोपनिषद् |
| अ.गी. | अवधूतगीता |
| अद्व.उ. | अद्वयतारकोपनिषत् |
| अ.म. | अद्वैतमकरन्दः |
| अ.र.म. | अद्वैतरसमञ्जरी |
| अ.वे.सा.को. | अद्वैतवेदान्तसाहित्येतिहासकोशः |
| अ.सि. | अद्वैतसिद्धिः |
| अ.हृ. | अष्टाङ्गहृदयम् |
| अक्ष.उ. | अक्ष्युपनिषत् |
| अप.अनु. | अपरोक्षानुभूतिः |
| अव.उ. | अवधूतोपनिषत् |
| आ.उ. | आरुणिकोपनिषत् |
| आ.बो. | आत्मबोधः |
| आ.वि. | आत्मविद्याविलासः |
| आ.श्रौ.सू. | आश्वलायनश्रौतसूत्रम् |
| आप.श्रौ.सू. | आपस्तम्बीयं श्रौतसूत्रम् |
| इति. उ. | इतिहासोपनिषत् |
| ई.उ. | ईशावास्योपनिषत् |
| ई.उ.शां.भा. | ईशावास्योपनिषच्छाङ्करभाष्यम् |
| उ.गी. | उद्धवगीता |
| उ.सा. | उपदेशसाहस्री |
| उत्त.गी. | उत्तरगीता |
| ऋ.भा.भू. | ऋग्वेदभाष्यभूमिका |
| ऋ.सं. | ऋग्वेदसंहिता |
| ऐ.उ. | ऐतरेयोपनिषत् |
| ऐ.उ.शां.भा. | ऐतरेयोपनिषच्छाङ्करभाष्यम् |
| क.प. | कल्पतरुपरिमलः |
| कठ. उ. | कठोपनिषत् |
| कठ.उ.शां.भा. | कठोपनिषच्छाङ्करभाष्यम् |
| का.प्र. | काव्यप्रकाशः |
| का.सू. | कामसूत्रम् |
| का.श्रौ.सू. | कात्यायनश्रौतसूत्रम् |
| कू.पु. | कूर्मपुराणम् |
| के.उ. | केनोपनिषत् |
| के.उ.शां.भा. | केनोपनिषच्छाङ्करभाष्यम् |
| कै.उ. | कैवल्योपनिषत् |
| कै.दी. | कैवल्यदीपिका |
| कै.दी.व्या. | कैवल्यदीपिका-प्रभाव्याख्या |
| कौ.उ. | कौषीतकिब्राह्मणोपनिषद् |
| कौ.ब्रा. | कौशीतकी ब्राह्मणम् |
| चित्यु. | चित्युपनिषत् |
| छा.उ. | छान्दोग्योपनिषत् |
| छा.उ.शां.भा. | छान्दोग्योपनिषच्छाङ्करभाष्यम् |
| जा.उ. | जाबालोपनिषत् |
| जा.द.उ. | जाबालदर्शनोपनिषत् |
| जी.वि. | जीवन्मुक्तिविवेकः |
| जै.न्या. | जैमिनीयन्यायमाला |
| जै.सू. | जैमिनिसूत्रम् |
| तं.वा. | तन्त्रवार्तिकम् |
| त.प्र. | तत्त्वप्रदीपिका |
| त.सं. | तर्कसङ्ग्रहः |
| तत्त्व. | तत्त्वानुसन्धानम् |
| ते.उ. | तेजोबिन्दूपनिषत् |
| तै.आ. | तैत्तिरीय-आरण्यकम् |
| तै.उ. | तैत्तिरीयोपनिषत् |
| तै.उ.शां.भा. | तैत्तिरीयोपनिषच्छाङ्करभाष्यम् |
| तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| तै.वा. | तैत्तिरीयोपनिषद्भाष्यवार्तिकम् |
| तै.सं | तैत्तिरीयसंहिता |
| त्रि.ता.उ. | त्रिपुरातापिन्युपनिषत् |
| त्रि.महा.उ. | त्रिपादविभूतिमहानारायणोपनिषत् |
| द.स्तो. | दक्षिणामूर्तिस्तोत्रम् |
| द.स्तो.वा. | दक्षिणामूर्तिस्तोत्रवार्तिकम् |

# प्रथमोऽध्यायः

## कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचारः

### १.१ किञ्चित् प्रास्ताविकम् —

कृष्णपण्डितविरचिता स्वोपज्ञप्रभाव्याख्यायुता कैवल्यदीपिकेति अद्वैतवेदान्तविषयक-प्रकरणग्रन्थस्य मातृकाग्रन्थस्य पाठसम्पादनं समीक्षितमध्ययनञ्च प्रकृतशोधप्रबन्धस्य विषयो वर्तते। तत्राऽऽदौ प्रकृतमनुसर्त्तुम् अद्वैतवेदान्तविषयाणां किञ्चित् प्रास्ताविकरूपेण सङ्क्षेपेण निरूपणं विधीयते।

### १.१.१ अद्वैतविकासः—

समेषामास्तिकानां विदितमेवैतद्यत् परमार्थतत्त्वदर्शनायैव प्रवृत्तानि नैकविधानि दर्शनानीति। तत्तत्त्वदर्शनं नाम सन्ततं जन्ममरणप्रवाहरूपे प्रपञ्चे संसरतः जीवस्य स्वस्वरूपसच्चिदानन्दात्मता-वाप्तिरूपमिति सर्वा विद्या उद्घोषयन्ति। यद्यपि "**नदीनां सागरो गतिः**[१]" इतिवत् समेषामास्तिक-दर्शनानामात्मतत्त्वबोधनाय प्रयासः तथापि न सर्वेषां दर्शनानां साक्षात्तदर्थप्रतिपादकत्वं किं तु परम्परया, इत्यतः साक्षाद् आत्मतत्त्वप्रतिपादनाद् वेदान्तदर्शनम् इतरदर्शनापेक्षया मूर्धन्यं स्थानं भजते। अस्मिन् खलु वेदान्तदर्शने प्रस्थानत्रयम् अतिप्रसिद्धम्— श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, न्यायप्रस्थानञ्चेति। प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः।[२] मुमुक्षोः किल संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तज्ज्ञानोपदेशको मार्गः वेदान्तः प्रस्थानपदेनाभिधीयते। यद्यपि सूत्रकारेण भाष्यकारेण वा न क्वापि प्रस्थानशब्देन व्यवहृतम् अथापि वेदान्तशास्त्रनिबन्धकरैः तच्छब्देन व्यवहृतम्। तत्र श्रुतिप्रस्थानम् "उपनिषद्" इति नाम्ना, स्मृतिप्रस्थानम् "भगवद्गीता" इति नाम्ना, न्यायप्रस्थानञ्च "ब्रह्मसूत्रम्" इति नाम्ना प्रसिद्धमस्ति।

---

[१] "गगनं गति ऋक्षाणां नदीनां सागरो गतिः। राजा गतिर्मनुष्याणां विप्राणां ब्राह्मणो गतिः॥" -सुभाषितम्

[२] "प्रस्थानं मार्गे" - वाच. पृ. ४५०१

"प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्" इति लोचने अभिनवगुप्तपादाः

वस्तुतः वेदेषु कर्मकाण्डम् उपासनाकाण्डं ज्ञानकाण्डञ्चेति काण्डत्रय। तत्र ज्ञानकाण्डं ज्ञानप्रतिपादकं चतुःसहस्त्रमन्त्रात्मकम्। प्रायः अद एव वेदान्तदर्शनमिति कथ्यते। तत्र वेदस्यान्तः सिद्धान्तः परमतात्पर्यं वा यस्मिन् स इति "अति बन्धने[1]" इत्यस्माद्धातोरन्तति बध्नाति व्यवस्थापयति वेदानां महातात्पर्यं यः स वेदान्तः। वेदान्तेऽस्मिन्मायाब्रह्मजीवानां निरूपणम्। तथापि "**वेदान्तो नाम उपनिषत्प्रमाणम्**[2]" इति वेदान्ताचार्यैरुपनिषद्दर्शनमेव वेदान्तदर्शनमिति स्वीक्रियते। वेदान्तेऽप्यद्वैतवादो विशिष्टाद्वैतवादः शुद्धाद्वैतवादो द्वैताद्वैतवादोऽचिन्त्याद्वैतवादो द्वैतवाद इति मतानि प्रस्तुतान्याचार्यैः। इदमेवोत्तरमीमांसाशब्देन व्यवह्रियते।

## १.१.२ श्रुतिस्थानम् —

"**तं त्वौपनिषदं पुरुषं पृच्छामि**[3]" इति श्रुत्यनुसारेण परमपुरुषस्य परमात्मन उपनिषदेकसमधिगम्यत्वमुक्तमिति प्रस्थानत्रये प्रथमं मुख्यं चेदमेव उपनिषत्प्रस्थानं श्रुतिप्रस्थानं वा। श्रुतिप्रस्थाने उपनिषदोऽन्तर्भवन्ति। उपनिषदां शैली क्वचित् काव्यशैलीवत् ललितोचितसंनिवेशचारुतरा प्रसादगुणगुम्फिता, क्वचिच्च नालिकेरपाकवत् दुर्बोधार्था। वैदिकसाहित्ये उपनिषदां स्थितिरन्यादृशी प्रतीयते। औपनिषदानाम् ऋषीणां कार्यप्रपञ्चब्रह्माण्डस्य अभिन्नत्वमखण्डत्वञ्च प्रतिपादने महान् विश्वासो दृश्यते। ब्राह्मणग्रन्थाः कर्मसु पुरुषं प्रेरयन्ति किन्तु उपनिषदस्तु ज्ञाने प्रेरयन्ति। वैदिका जना ऐहिकस्यैश्वर्यस्य प्राप्त्यर्थं यथा बद्धपरिकरा दृश्यन्ते, यथा च ब्राह्मणकालिका नराः स्वर्गादिलोकपरलोकेप्सवश्च दृश्यन्ते तथा उपनिषत्कालिका मनुष्या न दृश्यन्ते। जनिमतां सम्बन्धो न केवलं गतिशीलैः प्रत्यक्षीभूतवस्तुभिस्सह वर्तते परम् अनिर्वचनीयेन केनचित् स्थिरतत्त्वेनैव तेषां सम्बन्ध इत्युपनिषत्कालवर्तिनां जनानां सिद्धान्तः। तस्मात्कारणादेव औपनिषदसिद्धान्ता विचारप्रधाना वर्तन्ते।

"**केनेषितं पतति प्रेषितं मनः**[4]" इति जीवनसम्बद्धविचारे उपनिषदामैदम्पर्यं दृश्यते। "**यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति।।**[5]"

---

[1] धा.पा. ६१

[2] वे.सा., पृ. १

[3] बृह.उ. ३.९.२६

[4] के.उ. १.१

[5] श्वे.उ. ६.२०

इत्यत्र तु यथाऽऽकाशवेष्टनमसम्भवं तथेश्वरज्ञानमन्तरेण संसारसन्तरणमसम्भवमित्यौपनिषदां निर्गलितः सिद्धान्तः। अत एव "**तमेव विदित्वाऽतिमृत्येमेति नान्यः पन्था विद्यतेऽयनाय**[१]" इति निर्णीतं नैगमवचसा। तर्हि कथं स पन्थाः प्राप्तव्यः? कः देवः ज्ञेयः? कुत्रास्ति? कथमस्ति? किंलक्षणः? एको वा नैको वा? कर्ता वाऽकर्ता? सर्वज्ञो वा अल्पज्ञो वा? इत्येवं रूपेण विचारे सति प्रश्नवृष्टिरेव निपतति। एतादृशचिन्तनसन्तानानां विश्रान्तिस्थानं भवति उपनिषद्दर्शनम् अर्थाद् वेदान्तदर्शनम्।[२] उपनिषदो हि रहस्यात्मकगम्भीरार्थान् काव्यसुलभया गद्यपद्यात्ममशैल्या प्रतिपादयन्ति। वेदमूलकस्मृतिवद् उपनिषत्प्रस्थानमूलकत्वेनैव अपरप्रस्थानद्वयस्य गीताप्रस्थानस्य न्यायप्रस्थानस्य च प्रामाण्यम्। यतः सूत्रकारोऽपि न्यायेन वेदान्तार्थनिर्णये प्रवृत्तः प्रथमं ब्रह्मसूत्रेषु बहुत्र "श्रुतेः[३]", "शब्दात्[४]", "आमनन्ति[५]", "अधीयते[६]", शास्ति[७]" इत्यादिभिः श्रुतिमेव प्रमाणीकरोति। ततः "स्मृतेः[८]" "स्मरन्ति च[९]", "अपि च स्मर्यते[१०]" इति स्मृतिम्। सूत्रस्य तर्करूपत्वात् वेदान्तप्रमाणानुग्राहकत्वाच्च अङ्गत्वमेव। अतः प्रधानप्रस्थानोपकारकं सूत्रमपि प्रस्थानशब्देनाभिधीयते। अत एव भाष्यकाराः "वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्[११]" इति वदन्तः इममाशयमभिव्यञ्जयन्ति।

## १.१.३ स्मृतिप्रस्थानम् —

उपनिषदः नैककर्तृकाः असङ्ख्याकाश्च।[१२] अपि च एकस्यामेवोपनिषदि वक्तृभेदो दृश्यते। एवमसङ्ख्याभिरुपनिषद्भिरद्वैतवेदान्तभावाः प्रतिपादिताः। किन्तु उपनिषत्समय एव क्वचित्

---

[१] श्वे.उ. ६.१५; ३.८
[२] "वेदान्तो नाम उपनिषत्प्रमाणम्" – वे.सा., पृ. १
[३] ब्र.सू. २.४.१८; ३.४.१९
[४] ब्र.सू. १.१.६; १.३.१; २.१.४; २.४.१५; ३.१.२५; ४.४.१; ४.४.२२
[५] ब्र.सू. १.२.३२
[६] ब्र.सू. १.२.२०; १.२.२६
[७] ब्र.सू. १.१.१९
[८] ब्र.सू. १.२.६; १.२.३०; १.३.३०; १.३.३८; २.२.२५; ३.४.४३; ४.३.११
[९] ब्र.सू. २.३.४७; ३.१.१४; ४.१.१०
[१०] ब्र.सू. १.३.२३; २.३.४५; ३.४.३०; ३.४.३७;
[११] ब्र.सू.शा.भा. १.१.२
[१२] "सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्। सकृच्छ्रवणमात्रेण सर्वाघौघविकृन्तनम्॥"- मु.उ. १.४४
अपि च सार्धद्विशतादधिकानाम् उपनिषदां नामानि प्राप्यन्ते।

वैदिकधर्मविरोधिनां विचाराणां सूक्ष्मस्सद्भावो दृश्यते।[१] तस्माद्वैदिकमतानां हानिरिवाभूत्। विभिन्नदर्शनानां खण्डनस्य वैदिकधर्मस्य पुनः प्रतिष्ठापनाय करुणावरुणालयो भगवान् बादरायणः वेदव्यासः[२] पञ्चमवेदतुल्यं महाभारतं, महापुराणानि उपपुराणानि च निर्ममे। एतेषु महाभारतस्थश्रीमद्भगवद्गीता अन्यतमा वर्तते। श्रीभगवन्मुखारविन्दात् निःसृता अष्टादशभिरध्यायैः सप्तशतश्लोकैश्च पूर्णा, स्वभावमधुरपदविन्यासयुता, निःश्रेयसप्राप्त्युपायबोधिका, श्रुतीनामाशय-परिगृहीता, परश्शतैः प्राचीनैराचार्यैः प्रज्ञावद्भिश्च व्याख्याता, अध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिका भगवद्गीता अद्वैतवेदान्तसाहित्ये द्वितीयस्य स्मृतिप्रस्थानस्य स्थानलभत।

श्रीशङ्करभगवत्पादा अपि प्रस्थानत्रयभाष्यं निरूपयन्तः क्वचित् श्रुतीः स्मृतीश्च समाश्रित्य गीतावचनानि पुराणवचनानि च उदाजह्रुः। भगवत्पादैः शारीरकभाष्य एव गीतावाक्यानि बहूनि उदाहृतानि क्वचिच्च विष्णुपुराणस्य वायुपुराणस्य च श्लोकाः तैरुदाहृता दृश्यन्ते।[३]

## १.१.४ न्यायप्रस्थानम् —

सर्वकारणकारणं सच्चिदानन्दघनसत्यज्ञानानन्दस्वरूपमेकमेवाद्वितीयमत्यन्तमनन्तमसङ्गं नित्यं ब्रह्म औपनिषदगम्यम्। ब्रह्मज्ञानादेव मोक्ष इति वेदान्तसमयः।[४] ब्रह्मविषये अनाद्यपौरुषेय-श्रुतिरेव प्रमाणम्। श्रुतिश्चातिसङ्क्षिप्तत्वादत्यन्तं दुरवबोधा। भाषा चातिपुरातनी। लोकाश्चोत्तरोत्तरं मन्दबुद्धयः। उपनिषत्सु जीवात्मनोऽविनाशित्वप्रतिपादनेन यज्ञादिकर्मकाण्डतदुपोद्बलकजन्यं स्वर्गादिपारलौकिकसुखमेव शाश्वतमिति लोकानां मतिरभवत्। एतादृशं लोकप्रत्ययं निराकरिष्णुः भगवान् बादरायणो ब्रह्मसूत्राणि प्रणिनाय। ब्रह्मसूत्राणि च श्रुतिमीमांसामुखेनैव तत्त्वोपदेशाय प्रवृत्तानि। श्रुत्यर्थनिर्णयार्थं यो लोकवेदसाधारणो नियमो मीमांसकैराविष्कृतः अवधारितश्च तेनैव नियमेन श्रुत्यर्थोऽद्वैतमते निरूप्यते। सोऽयं ब्रह्मसूत्रेषु प्रतिपादितो वेदान्तसिद्धान्तः भगवत्पादैः "**वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्**[५]" इति रूपेण सूत्रभाष्ये उपवर्णितम्।

---

[१] "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीतिचैके" (कठ.उ. १.१.२०), "असदेवेदमग्र आसीत्" (छा.उ. ३.१९.१) इत्यादिना सर्वशून्यवादो निष्क्रियवादो वा वेगेन प्रचलित आसीदनन्तरभावि काले।

[२] "विव्यास वेदान् यस्माच्च तस्माद् व्यास इति स्मृतः।
द्वीपे न्यस्त स्वयं बालस्तस्माद्द्वैपायनोऽभवत्॥" – म.भा. १.५७.७३

[३] द्रष्टव्यम् – १.३.२३, २.३.४५ , ३.४.३०, ३.४.३७, २.३.४७, ३.१.१४, ४.१.१९, ४.२.१४, १.२.६, ४.३.११

[४] "नान्यः पन्था विद्यतेऽयनाय" - श्वे.उ. ६.१५

[५] ब्र.सू.शां.भा. १.१.२ पृ. ८८

एवमुपनिषद्दर्शनस्य व्याख्यानार्थं प्रख्यानार्थं च भगवता बादरायणेन वेदान्तसूत्राणि सूत्रितानि। आचार्यशङ्करेण स्वकीयशारीरकभाष्ये युक्तितर्कसहकारेण वेदान्तसूत्राणामद्वैतव्याख्या प्रस्तुता। प्रायेण वेदान्तमतविरोधिनस्सर्वेऽपि वेदान्तमतखण्डनाय अद्वैतमेव खण्डयन्ति। इतरदार्शनिका बौद्धजैना अपि अद्वैतमेव खण्डयन्ति। तस्मात् बादरायणनिर्मितानि अद्वैतमूलभूतानि ब्रह्मसूत्राणि तृतीयं न्यायप्रस्थानमिति जेगीयन्ते।

## १.१.५ अद्वैतसिद्धान्तविकासः —

एतादृशस्य श्रुतिसिद्धस्य प्राचीनतमस्य अज्ञविज्ञोपकारकस्य सकलदर्शनशिरोऽलङ्काररत्नभूतस्य अद्वैतदर्शनस्य विशेषतः प्रबलप्रतिवादिनः भेदवादिनो न्यायवैशेषिकादयः, शालिकनाथप्रभृतयः पूर्वमीमांसकाः आसन्। तदनु त्रयोदशशतकादनन्तरं द्वैतमतप्रवर्तका आनन्दतीर्था अपि प्रतिवादिषु अन्यतमा अभूवन्। एभिः द्वैतवादिभिः युक्त्याभासैः कलुषितस्य अद्वैतसिद्धान्तस्य रक्षणार्थं तर्केणैव समाधानार्थं चित्सुखी-न्यायमकरन्द-न्यायदीपावली-खण्डनखण्डनखाद्य-अद्वैतसिद्धि-पञ्चदशीत्यादयो ग्रन्था विशेषतोल्लेखार्हाः। तत्र इतरमतखण्डनपरग्रन्थेषु शैलीद्वयं दृश्यते। तत्र चित्सुख-आनन्दबोधादीनां तु प्राचीना शैली युक्तिसहिता अर्थगाम्भीर्यवती श्रुतिमधुरशब्दविन्याससमन्विता सम्भाषमाणा दृश्यते। नैतच्छैल्यां काठिन्यं न वा विषयप्रतिपादने युक्तिकथने शब्दविन्यासे वा मन्दता दृश्यते। दृढयुक्तिकानि न्यायोपबृंहितानि च रमणीयानि वाक्यानि तेषां वाग्मितां सिद्धान्तविमर्शक्षमताञ्च प्रदर्शयन्ति। तदनु नव्यन्यायशैल्या भेदवादखण्डनार्थं प्रवृत्ताः मधुसूदनसरस्वतीप्रभृतयस्तु “यक्षानुरूपो बलिः” इति न्यायेन नवीनन्यायशैल्या परिष्कारप्रधानशैल्या इतरमतखण्डने प्रवृत्ताः।

वेदान्ते उपनिषद्-गीता-सूत्ररूपाणि श्रुति-स्मृति-युक्तिनाम्ना व्यवहृतानि त्रीणि प्रस्थानानि प्रसिद्धानि। तथा भामतीप्रस्थानम्, विवरणप्रस्थानमिति च अवान्तरप्रस्थानं सिद्धान्तप्रतिपादनभेदमूलकं प्रसिद्धं विद्यते, एतत् प्रस्थानद्वयमपि—

**यय यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।**
**सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता ॥**[१]

---

[१] बृ.उ.भा.वा. १.४.४०२

इति सुरेश्वरोक्त्या मान्यतां प्राप्नोत्येव। यद्यपि उभायोरपि प्रस्थानयोः सिद्धान्तस्तु एक एव, तथापि सिद्धान्तप्रतिपादने प्रक्रियाभेदेन ईषद्भेदो दृश्यते। तदिह वेदान्तजिज्ञासूनां कृते सुलभतयावगमाय तालिकारूपेण प्रदर्श्यते –

| **क्रमः** | **भामतीप्रस्थानम्** | **विवरणप्रस्थानम्** |
|---|---|---|
| १. | कर्मणां विविदिषार्थत्वम् | कर्मणां विद्यार्थत्वम् |
| २. | ब्रह्मसाक्षात्कारे मन एव करणम् | तत्त्वमस्यादिवेदान्तवाक्यरूपशब्द एव करणम् |
| ३. | श्रवणमनननिदिध्यासनानां मध्ये निदिध्यासनमङ्गि अपरे अङ्गभूते | श्रवणमनननिदिध्यासनानां मध्ये श्रवणमङ्गि अपरे अङ्गभूते |
| ४. | “श्रोतव्यो मन्तव्यः” इति वाक्ये विधिर्नास्ति | “श्रोतव्यो मन्तव्यः” इति वाक्ये विधिरस्ति |
| ५. | जीवात्मविषये अवच्छेदवादः | प्रतिबिम्बवादः |
| ६. | अज्ञानस्य आश्रयो जीवः, विषयस्तु ब्रह्म | अज्ञानस्य आश्रयविषयौ ब्रह्म |
| ७. | मूलाविद्यायाः जीवभेदेन नानात्वम् | एकैव मूलाविद्या |
| ८. | उपहितं ब्रह्म एव अखण्डाकारवृत्तेः विषयः | शुद्धं ब्रह्म एव अखण्डाकारवृत्तेः विषयः |
| ९. | साधनचतुष्ट्ये सत्यासत्यवस्तुविवेकः प्रथमसाधनम् | साधनचतुष्टये नित्यानित्यवस्तुविवेकः प्रथमसाधनम् |
| १०. | “स्वाध्यायोऽध्येतव्यः” इति विधिरर्थावबोधफलकः | “स्वाध्यायोऽध्येतव्यः” इति विधिरक्षरग्रहणफलकः |
| ११. | त्रिवृत्करणं स्वीक्रियते | पञ्चीकरणं स्वीक्रियते |
| १२. | ब्रह्मणः सर्वज्ञत्वं स्वरूपचैतन्येन | ब्रह्मणः सर्वज्ञत्वं मायावृत्तिभिः |
| १३. | मनस इन्द्रियत्वमस्ति | मनस इन्द्रियत्वं नास्ति |
| १४. | अविद्या जीवाश्रिता | अविद्या ईश्वराश्रिता |
| १५. | अविद्यारूपिणा उपाधिना सहितं ब्रह्मणः विशुद्धं चैतन्यं जीवः | अन्तःकरणतत्संस्काराविच्छिन्नाज्ञानप्रति-बिम्बितं चैतन्यं जीवः |

श्लोकस्य अर्थपरिवर्तनमपि न भवति। तथा हि–

मगण सगण जगण सगण तगण तगण गु
ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ
**श्रीमद्देशिक ! यत्त्रिभिश्च करणैः क्लृप्तं तु कर्मैव चेत्** = १९ वर्णाः

अस्यां मातृकायां क्वचित्तु प्रतिलिपिकारस्य तथा मातृकाग्रन्थस्य एकमातृकात्वात् छन्दोभङ्गः समवलोक्यते। तथा हि –

(१) **जातं भोगात् सुखं यद्विषयसुखमिदं ब्रह्मसौख्यं सुषुप्तौ**
**निद्रान्ते वासनाख्यं सुखमिह सकलानन्दात्मसौख्यम्।**
**योगोत्थं मुख्यसौख्यं स्वसुखमिदमुदासीनकालोत्थितं यत्**
**चाद्वैतं पूर्णदृष्ट्या जनितमपि महावाक्यजं ज्ञानसौख्यम्॥**[1] इति।

अस्मिन् श्लोके स्रग्धरा वृत्तमस्ति। किन्त्वत्र द्वितीयचरणे वर्णद्वयं न्यूनमस्ति। अतः यदि "सकलानन्दात्मसौख्यम्" इति पदे यदि वर्णद्वयं योज्यते तर्हि, स्रग्धरावृत्तस्य लक्षणं सङ्गच्छत अत्र। अर्थपरिवर्तनमन्तरा तदित्थं परिवर्तयितुं शक्यते –

मगण रगण भगण नगण यगण यगण यगण
ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ
**निद्रान्ते वासनाख्यं सुखमिह सकलानन्ददं चात्मसौख्यम्**

अत्र "सकलानन्दात्मसौख्यम्" इति स्थाने "सकलानन्ददं चात्मसौख्यम्" इति पाठः स्रग्धरावृत्तलक्षणान्वितो युक्ततमः स्यात्।

(२) **अतन्निरासवाचकैस्स्वरूपवाचकैर्मिथः**
**समेत्य सम्यगीरितः परश्शिवस्स एकः।**
**भिदा हि वाचकेषु सा न लक्ष्यवस्तुनि स्थिता**
**भवान् विधूय संशयानखण्डमेतु निश्चयम्॥**[2] इति।

---

[1] कै.दी. २.१२३
[2] कै.दी. २.१३८

अस्मिन् श्लोके पञ्चचामरवृत्तं प्रयुक्तं दृश्यते। पञ्चचामलक्षणं –“**जरौ जरौ जगाविदं वदन्ति पञ्चचामरम्**[1]” इति। यत्र हि प्रतिचरणं षोडश वर्णा भवन्ति अर्थात् जगण-भगण-जगण-रगणैः युतं पञ्चचामरं नाम वृत्तं भवति। प्रकृतश्लोकस्य द्वितीये चरणे पञ्चदश वर्णा एव दृश्यन्ते। अतो यदि द्वितीयचरणान्ते “एकः” इति पाठस्थाने “एककः” इति पाठः स्यात्तर्हि अर्थपरिवर्तनमन्तरा पञ्चचामरवृत्तलक्षणं सङ्गच्छते । तथा हि –

जगण रगण जगण रगण जगण गु
।ऽ। ऽ।ऽ।ऽ।ऽ।ऽ।ऽ। ऽ।ऽ
**समेत्य सम्यगीरितः परश्शिवस्स एककः ।** = १६ वर्णाः

**(३) ऊहैक्लृप्ते विचारे परिगणितमबोधाख्यभूसप्तकं बो-**
**धाख्यं भूसप्तकं तच्छ्रुतिवचनपरैरुच्यते पूर्वमादौ ।**
**बीजाख्यं जाग्रदेकं पुनरपि तथा जाग्रदन्यन्महान्यो**
**जाग्रत्स्वप्नश्च सन्ध्यं पुनरपि च तथा स्वप्नजाग्रत्सुषुप्तिः॥**[2] इति।

अस्मिन् श्लोके स्रग्धरावृत्तमस्ति । किन्तु तृतीयचरणे स्रग्धरावृत्तपूरणार्थम् एको वर्णः न्यूनः अस्ति। अतः तदर्थम् एको हस्ववर्ण आवश्यकः, इत्यतः अत्र “हि” इति कल्पयितुं शक्यते। तद्यथा –

मगण रगण भगण नगण यगण यगण यगण
ऽऽ ऽऽ ऽ।ऽऽ । ।।।। ।ऽ ऽ।ऽऽ।ऽऽ
**“बीजाख्यं जाग्रदेकं [हि] पुनरपि तथा जाग्रदन्यन्महान्यः”** इति।

एवञ्च विहाय जीर्णपाठं लुप्तपाठं वा सर्वेषां छन्दसां वृत्तनिर्धारणं सुगमतया कर्तुं शक्यते। अतः प्रसिद्धानुरोधेन कृतं छन्दोऽनुसरणं निर्विवादं परितोषाय भवति। एवंविधानि कतिपयस्थलानि विहाय च्छन्दसां लक्षणानुसरणमत्र सम्यक्तयाऽनुसृतमस्ति। ग्रन्थारम्भे मङ्गलाचरणे तथा ग्रन्थान्ते शार्दूलविक्रीडितच्छन्दो दृश्यते। एवं साकल्येनास्य ग्रन्थस्य भाषा संस्कृता सरला मधुरा चास्ति। भाषाविषयिण्योऽशुद्धयो नात्राधिका वर्तन्ते।

[1] वृ.र. ३.६७
[2] कै.दी. २.१४६

अस्मिन् ग्रन्थे ग्रन्थकारेण प्रायः बहूनाम् आर्षपदानां प्रयोगः कृतोऽस्ति। शृणुष्व, तिष्ठस्व, गमिष्ये, गच्छेरन् इत्यादीनि यानि पदानि लोके अप्रसिद्धानि किन्तु भारतादौ आर्षवाङ्मये प्रसिद्धानि सन्ति, तानि पदानि अयं ग्रन्थकारः स्वकीयग्रन्थे बहुत्र अजग्रन्थत्। तथा हि –

(१) "**ते च क्षणेन गच्छेरन्नेव तत्र दृष्टान्तः पुष्करपलाशवत्**"[१] इति। अस्मिन् वाक्ये "गच्छेरन्" प्रयोगोऽयम् अपाणिनीयः। "गम्लृँ-गतौ" इति धातुः (धा.पा. ९८२) परस्मैपदी वर्तते। अतः परस्मैपदत्वाद् विधिलिङ्गलकारे प्रथपुरुषबहुवचने "गच्छेयुः" इति रूपं स्यात्। कर्मव्यतिहारे अस्य धातोः आत्मनेपदत्वं युज्यते। पाणिनीयतन्त्रे "गच्छेरन्" इति रूपं "**कर्तरि कर्मव्यतिहारे**[२]" इत्यनेन सिध्यति। क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं भवतीति सूत्रार्थः। उदाहरणानि यथा "व्यतिलुनीते", "संप्रहरन्ते राजानः" इत्यादीनि। एतद्विस्तृतरूपेण अस्य श्लोकस्य पादटिप्पण्यामस्माभिः चिन्तितम्।

(२) "**अध्यारोपमथापवादमपि यः प्रोक्त्वास्य कारुण्यतः**[३]" इति। इत्यत्र "प्रोक्त्वा" इति प्रयोगोऽपाणिनीय भाति। यतो हि "**समानकर्तृकयोः पूर्वकाले**[४]" इत्यनेन क्त्वाप्रत्ययो विधाय "**समासेऽनङ्पूर्वे क्त्वो ल्यप्**[५]" इत्यनेन अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशे कृते सति "प्रोच्य" इति पाठः स्यात्।

(३) "**तिस्रस्ता हि विरक्तयः श्रुतिमता मन्दा च तीव्रातमा**[६]" इति। अत्र तीव्रतमा इति पाठः स्यात्। किन्तु छन्दस्त्वात् "तीव्रातमा" इति प्रयोगः कृतः स्यात्।

(४) "**तद्वद्विक्षिप्तचित्ता अभिलषितमहाकामजालाः पतन्ते**[७]" इति। अस्मिन् वाक्ये "पतन्ते" प्रयोगोऽयमपाणिनीय इति भाति। भ्वादिगणस्थः "पत्लृ-गतौ" इति धातुः (धा.पा. ८४५) परस्मैपदी वर्तते। किन्तु "पतन्ति" इति पदप्रयोगे छन्दोभङ्गः स्यात् ।

---

[१] कै.दी.व्या. १.९६
[२] पा.सू. १.३.१४
[३] कै.दी. २.३
[४] पा.सू. ३.४.२१
[५] पा.सू. ७.१.३७
[६] कै.दी. २.१६०
[७] कै.दी. २.५४

किन्तु नेयं पक्षः प्रबलः। अस्मिन्नेव श्लोके चतुर्थे चरणे अन्तिमो वर्णः लघुभूतो दृश्यते, स च स्रग्धरावृत्तलक्षणानुसारं गुरुः स्यात्।

अयं मातृकाग्रन्थः स्वोपज्ञव्याख्यायुतोऽस्ति। ग्रन्थस्यास्य व्याख्या सरला सरसा च वर्तते। "नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" इति मल्लिनाथोक्तरीत्या अनेन श्लोकेषु विद्यमानानां पदानां काव्यकोषार्थदृष्ट्या व्याख्या कृता। अतोऽत्र नाधिकः क्रियापदानां प्रयोगः। क्वचिदयं श्लोकस्थपदानि व्याख्यायन् समग्रव्याख्यानस्य अन्ते क्रियापदं प्रयुक्तवान्। तथापि यत्र व्याख्यानस्य आवश्यकता वर्तते तत्र भूयो भूयः उदाहरणानि दत्त्वा तत्पदं स्पष्टयति। एतदर्थम् अनेन ग्रन्थकर्त्रा संस्कृतसाहित्ये प्रसिद्धानां बहूनां न्यायानामपि प्रयोगः कृतो वर्तते। एवं साकल्येन अस्य ग्रन्थस्य स्वोपज्ञप्रभाव्याख्याऽपि सरला सुगमा सरसा च विद्यते।

अयं ग्रन्थकारो दाक्षिणात्य इत्यतः अयं प्रायः लकारस्थाने ळकारस्य प्रयोगमकरोत्।[१] मातृकाग्रन्थे प्रतिलिपिकारस्यापि प्रमादतः क्वचिल्लेखनसम्बन्धिदोषा दृश्यन्ते। यथा "ब"कारस्य स्थाने "व"कारः, "ञ्ज"कारस्थाने "ज्ज" इति द्विजकारन्यास इत्याद्येवंरूपाणि भाषादृष्ट्याऽशुद्धानि पदानि वर्तन्ते। तेषां संशोधनं सम्पादिते ग्रन्थे मया विहितमस्ति।

अतः भाषायाः छन्दसश्च दृष्ट्याऽयं ग्रन्थः सरलः सुगमश्च विद्यते। तेनाऽस्य ग्रन्थस्य पठनात् सरलतया वेदान्तशास्त्रतत्त्वानां सुखबोधो भवति, किञ्च ग्रन्थकारेण ग्रन्थारम्भे या प्रतिज्ञा कृता साऽपि पूर्णतां याति।[२] ग्रन्थकारेण ग्रन्थान्ते ग्रन्थस्य फलश्रुतिविषये इत्थं निरूप्यते—

**शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां**
**यद्वद्भूगतसर्वतीर्थपयसा मामज्जन्तोत्थं फलम्।**
**ये कैवल्याख्यमिदं पठन्ति सुधियश्शास्त्रं प्रबोधप्रदं**
**ते नित्यं परिपूर्णसौख्यभरिता नन्दन्ति मुक्तास्स्वयम्॥**[३] इति।

अस्मिन् ग्रन्थे वेदान्तसम्बन्धान् दुरूहगभीरविषयान् ग्रन्थकारः सरलयुक्तिं सरस-वर्णनपद्धतिञ्चाश्रित्य वर्णयति। अतः यथा ग्रन्थकृतोक्तं तथैव सर्वत्र ग्रन्थेऽनुभूयते।

---

[१] यथा "आर्द्राङ्गकोऽक्षिविगळत्सुखवारिपूर्णः" कै.दी., १-१७
[२] कै.दी., १.५; १.६;
[३] कै.दी., २-१७६

एवञ्च इदमत्रोपसंह्रियते यदत्र "**कृष्णः - तद्देशकालकृतिवैदुष्यादीनां विचारः**" इत्याख्ये प्रथमाध्याये कैवल्यदीपिकायाः प्रास्ताविकरूपेण अद्वैतसिद्धान्तस्य विकासः, श्रुतिस्मृतिन्यायप्रस्थानस्य परिचयम् उपस्थाप्य कर्तुः कृष्णस्य देश-काल-वंश-कृत्यादीनां विस्तृतः परिचयः विदुषां विमर्शकानां च शोधलेखानामाधारेण उपकल्पितो वर्तते। अपि च ग्रन्थस्यास्य प्रतिपाद्यम्, ग्रन्थेऽस्मिन् समावेशितानां काव्यतत्त्वानां छन्दसां स विवेचन, काव्यवैशिष्ट्यम्, प्रभाव्याख्याया परिचयो वैशिष्ट्यञ्च इत्येते विचारा विमर्शपद्धत्यनुरोधेन समालोचिताः समावेशिताः सन्ति।

एवमुपलभ्यमानयोः मातृकयोराधारेण ग्रन्थकृत्सम्मतान् पाठान् मातृकासम्पादनविधिम् आश्रित्य युक्तिभिर्निर्णीय प्रभाव्याख्योपेता कैवल्यदीपिका सम्प्रति अस्माभिः द्वितीयाध्याये समुपस्थाप्यते।

ज्ञानसाधिका, चरमा जीवकृता तु मनोमयादिसृष्टिः अनर्थहेतुः ज्ञानबाधिका भवति। यथा चावादि कैवल्यदीपिकाकारेण–

**उत्कृष्टस्य परस्य सृष्टिरनघा जीवस्य सृष्टिः परा**
**सामान्यापि यदादिसर्वजगतां विस्फूर्तिराद्या मता।**
**अन्त्याहङ्कृतिकामलोभविषयप्राग्भारसंदूषिता**
**सृष्टिर्जीवकृतैव नेश्वरकृतेत्येवं भवान्तुष्यताम्॥**[1] इति।

पञ्चदश्यामपि अयमेवार्थो विद्यारण्यमुनयः प्राहुः—

**ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते।**
**विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत्॥**[2] इति।

कारणोपाधिपाकेनान्तर्यामिणा ईश्वरेण कार्योपाधिकेनाहम्प्रत्ययिना जीवेन च सृष्टमुत्पादितम्। श्लोकेऽस्मिन् यद्यपि जीवेश्वरयोरुभयोरपि जगत्स्रष्टृत्वे प्रतिपिपादयिषितेऽपिशब्दो जीवेनेत्यनन्तरं पठितुं युक्तः, यतो हि सम्मुच्चयद्योतकस्य समुच्चेयार्थबोधकपदोत्तरं पाठनियमात्, तथापि बहूनां जीवस्य जगत्स्रष्टृत्वे विप्रतिपत्त्यभावादीश्वरस्रष्टृत्वमात्रविप्रतिपत्तेः परिहारसूचनाय ईश्वरस्यापि स्रष्टृत्वं स्फोरयितुमीश्वरपदोत्तरमपिशब्दप्रयोग इति बोध्यम्।

पारमेश्वरी सृष्टिः अद्वैतज्ञानं प्रति प्रतिबन्धकं न भवति, प्रत्युत अद्वैतसाधकं भवतीति अन्वयव्यतिरेकाभ्यां साधयितुं शक्यते। तथा हि सकलतनुभृतां चतुर्विधभूतग्रामाणां नियन्तुरन्तर्यामिणो लीलाविनोदमात्रा ईक्षणादिप्रवेशावसानाः सृष्टय, जीवेभ्यो मोक्षदात्र्यस्सन्ति। जीवसृष्टयस्तु जाग्रदादिविमोक्षान्ता अपि मध्ये जनिमृतिकल्पनादुःखभाजो जन्ममरणसंयोगवियोगादिक्लेशवत्यो भवन्ति। अत ईश्वरसृष्टं द्वैतमद्वैतज्ञानस्य साधकम्। ईश्वरसृष्टद्वैताभावे गुरुशास्त्रादेरभावप्रसङ्गेन तदुपदेशासम्भवाद् ब्रह्मज्ञानं नोदीयादेव। अतो ब्रह्मज्ञानोपायभूतगुरुशास्त्रादिसम्पादकत्वेन ईश्वरसृष्टं द्वैतं साधकमेव। अतस्तत्र द्वेषो न कार्यः, नापि तत्रौदासीन्यमपि। अयमेवार्थः कैवल्यदीपिकारेण एवं स्फुटीकृतः –

---

[1] कै.दी. २.५६
[2] पं.द. ४.१

**नेतुर्ब्रह्मादिमूर्तेः सकलतनुभृतां सृष्टयो मुक्तिदात्र्यो**
**जीवानां सृष्टयस्ता जनिमृतिकलना दुःखरूपा भवन्ति।**
**नष्टेऽस्मिन्स्थावरादावपि जगति न कोऽप्याप्नुयादेव मुक्तिं**
**नष्टे कामादिदोषे कृतबहुलभयं जन्मदुःखं विनश्येत्॥**[१] इति।

## ४.५.२ चतुर्विधः कल्पः —

ब्रह्मण उत्पन्नस्य प्रपञ्चस्य उत्पन्नादेव लयोऽपि भवति। स च कैवल्यदीपिकाकारेण कृष्णेन सङ्क्षेपेण स्फुटं प्रतिपादितः। तद्यथा –

**कल्पान्ते परमेश्वरस्य कलने नष्टेऽपि के वा गता**
**मुक्तिं सत्यपि देशकालकलने जीवस्य मोहे गते।**
**वैराग्येण नयेऽपि सञ्चितलयात्प्राप्ता विमुक्तिं परां**
**पाशो मोहमयः पशोर्विरचितो नासौ भवेत्तत्पतेः॥**[२] इति।

कल्पान्तशब्दो ह्यत्र प्रलयार्थे प्रयुक्तः। "**कल्पयति सृष्टिं विनाशं वात्र**[३]" इति व्युत्पत्त्या कल्पशब्दः सृष्टिं विनाशञ्च द्योतयति। अतः कल्पप्रलयेत्यनर्थान्तरम्। स च कल्पान्तश्चतुर्विधः। तथा हि – "**कल्पश्चतुर्विधः। नित्यः प्राकृतिको नैमित्तिकः आत्यन्तिकश्च**[४]" इति। भागवतपुराणेऽपि उक्तम्-

**नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।**
**आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी॥**[५] इति।

तत्र दैनन्दिनः प्रत्ययः सौषुप्तो नित्यप्रलयः, तस्य सकलकार्यप्रलयरूपत्वात्। कार्यब्रह्मणो दिवसावसाननिमित्तस्त्रैलोक्यप्रलयो नैमित्तिकः, मायाजन्यसर्वविकारस्य प्रकृतौ लयः प्राकृतिक-प्रलयः, विदेहमुक्तिफलः आत्यन्तिकप्रलयः।

[१] कै.दी. २.५७
[२] कै.दी. २.५८
[३] वाच. पृ. १८१५
[४] कै.दी.व्या. २.५८
[५] भा.पु. १२.४.३८

अद्वैतवेदान्तशास्त्रे एवमेव प्रलयो न्यरूपयत। प्रलयो नाम त्रैलोक्यरूपकार्यविनाशः। तथा हि कार्यस्य स्वोपादाने सूक्ष्मरूपेण अवस्थान प्रलय इत्युच्यते। यथा महाप्रलयाधिष्ठानत्व ब्रह्मणः, एवं सुषुप्त्यधिष्ठानत्वमपि तस्यैव, "**सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति**[1]" इति श्रुतेः। तत्र आत्यन्तिको मोक्षाख्यः प्रलयः श्रुतिषु बहुधा प्रतिपाद्यते। स च प्रलयः प्रागुक्तरीत्या चतुर्विधः। तथा च उक्तम् –

**नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज !।**
**नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः॥**[2] इति।

वेदान्तेषु क्वचित्तु प्रलयस्य त्रैविध्यमपि श्रूयते। तद्धि – आवरणशक्तिमदज्ञानात्मना अवस्थानम्, शक्तिद्वयवदज्ञानात्मना अवस्थानम्, ब्रह्मभावश्चेति। अतो यत्र प्रलयस्य त्रैविध्यमुच्यते तत्तु पौराणिकीं प्रसिद्धिमाश्रित्यैव न्यरूपिषत, तदपि अङ्गीकार्यम्। क्वचिद्धि पुराणे प्रलयस्य त्रैविध्यमेवं श्रूयते –

**सर्वेषामेव भूतानां त्रिविधः प्रतिसंचरः।**
**नैमित्तिकः प्राकृतिकः तथैवात्यन्तिको लयः॥**[3] इति।

एतस्याङ्गीकारकारणन्तु श्रुतिविरोधाभावे स्मृतिप्रामाण्यस्य अवश्यमङ्गीकार्यत्वाद्विद्यत एव। अथवा अयमेव त्रिविधः प्रलयः एवंरूपेण चतुर्विधो विभक्तुं शक्यते। तत्र आद्यो व्यष्टिजीवापेक्षया नित्यः, समष्टिजीवापेक्षया नैमित्तिक इति द्विविधः, द्वितीयः प्राकृतः, तृतीयश्च आत्यन्तिक इति साकल्येन प्रलयस्य चातुर्विध्यम्।

### ४.५.२.१ नित्यः प्रलयः —

"**नित्यः सदैव भूतानां यो विनाशो दिवानिशम्**[4]" इति स्मृतिवाक्येन नित्यः प्रलयः सुषुप्तिः। अपि च "**यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथ अस्मिन् प्राणे एवैकधा भवति। अथैनं वाक्सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वैः रूपैः सहाप्येति, श्रोतं सर्वैः शब्दैः सहाप्येति,**

---

[1] छा.उ. ६.८.१
[2] वि.पु. १.७.४१
[3] वि.पु. ६.३.१
[4] वि.पु. १.७.४३

**मनः सर्वैः ज्ञानैः सहाप्येति** [१]", "**सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति**[२]", "**इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति**[३]" इत्यादिश्रुतयः सुषुप्तिकाले सर्वेषां कार्याणां कारणात्मना अज्ञानात्मना लयं ज्ञापयन्ति। तथा च सुषुप्तिः सकलकार्यप्रलयरूपा अज्ञानकार्यलिङ्गशरीरप्रविलयरूपा इति तस्याः प्रलयत्वम्। "**सुषुप्तिकाले सकले विलीने**[४]" इत्यादिश्रुतौ च सुषुप्तिकाले सकलप्रपञ्चप्रलयः श्रूयते। अयञ्च लयः आवरणशक्तिमदज्ञानात्मना अवस्थानमिति बोद्धव्यम्। अत एव सुषुप्तौ "सुखेनाहमस्वाप्सं न किञ्चिदवेदिषम्" इत्यनुभवः, न तु "न किञ्चिदस्ति" इति। सुप्तोत्थितस्य सुखदुःखाद्यनुपपत्तेः सुषुप्तेरपि मूलाविद्यारूपत्वमिति न च वाच्यम्। सुषुप्तौ हि सुखदुःखस्मरणादिकारणानां धर्माधर्मपूर्वसंस्काराणां च सूक्ष्मरूपेण कारणात्मना अविद्यात्मना वा अवस्थानमिति तेषां सावशेषो लयः, न तु निरवशेषः। तेन सुप्तोत्थितस्य पुरुषस्य प्राचीनसुखदुःखादीनामनुभवः स्मरणञ्चोपपद्यते।

अत्रेयं शङ्का स्यात् – सुषुप्तौ अन्तःकरणादीनां स्वरूपत एव भानं स्वीकरणीयम्, न तु अज्ञानात्मना। सुषुप्तौ अन्तःकरणस्य तथाभ्युपगमे हि अन्तःकरणाधीनश्वासादिक्रियाणामनुपपत्तिः स्यात्। अत्रोच्यते – सुप्तपुरुषस्य "न किञ्चिदवेदिषम्" इति अज्ञानमात्रस्यैव प्रतीतेः वस्तुतो न श्वासादेः भानमस्ति। तदुपलब्धिस्तु पुरुषान्तरविभ्रममात्रम्। न चैवं सुषुप्तस्य मृतादविशेष इति वाच्यम्। सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना इहलोके एव वर्तते, मृतस्य तु लोकान्तरे इतीयान् विशेषः सुषुप्त्यवस्थाया मरणावस्थायाश्च। अथवा अन्तःकरणस्य द्वे शक्ती – ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टस्य अन्तःकरणस्य एव सुषुप्तौ विनाशः, न तु क्रियाशक्तिविशिष्टस्य, तेन प्राणाद्यवस्थानमविरुद्धमिति।

### ४.५.२.२ नैमित्तिकः प्रलयः —

कार्यब्रह्मणो दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः। नैमित्तिकप्रलये च–

---

[१] कौ.उ. ३.३
[२] छा.उ. ६.८.१
[३] छा.उ. ८.३.२
[४] कै.उ. १३

**एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।**
**शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चाखिलम्॥**[1]

इति श्रुतिर्मानम्। अत्र “**यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति**[2]” इति स्मृतिवचनबलात् समष्टिजीवात्मकस्य हिरण्यगर्भस्य सुषुप्तिः एव नैमित्तिकः प्रलयः। अस्मिन् प्रलये आवरणशक्तिमदज्ञानात्मनैव सर्वस्य प्रपञ्चस्य अवस्थानम्। तथा चात्र त्रैलोक्यमात्रस्य इति मात्रपदं यावदर्थकम्। सर्वकार्यविनाशो नैमित्तिकप्रलय इति यावत्। एतद्व्याख्यानं न युक्तमिति केचित्। तेषां मते कार्यब्रह्मणः अर्थात् प्रजापतेः विराजः दिवसावसानाद्धेतोः भूरादिलोकत्रयस्य प्रलयः, न तु मह आदिलोकस्य। तत्र च प्रमाणमिदं स्मृतिवचनम् –

**चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम्।**
**ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसञ्चरः॥**
**तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम्।**
**जनं प्रयान्ति तापार्ता महर्लोकनिवासिनः॥**[3] इति।

ब्रह्मणो दिवसः चतुर्युगसहस्रपरिमितः कालः। “**चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते**[4]”, “**कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्। प्रोच्यते तत् सहस्रं तु ब्रह्मणो दिवसो मुने**[5]” इत्यादिवचनात्।

### ४.५.२.३ प्राकृतिकः प्रलयः —

प्रलयोऽयं प्राकृत इत्यप्युच्यते। तत्र प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यविनाशः। आवरणविक्षेपशक्तिद्वयविशिष्टाज्ञानं प्रकृतिः माया वा इत्युच्यते। मायाख्यायां प्रकृतौ मूर्तामूर्तरूपस्य सकलकार्यरूपप्रपञ्चस्य नाशः अर्थात् तदात्मनाऽवस्थानं प्राकृतः प्रलय इति। प्रलयोऽयं कार्यब्रह्महिरण्यगर्भविनाशानन्तरं भवति। तथा च निर्गलितोऽयमर्थः – कार्यब्रह्मविनाशा-

---

[1] भा.पु. १२.४.४१
[2] मनु.स्मृ. १.५२
[3] वि.पु. १.३.२२-२३
[4] ब्र.पु. २३२.११
[5] ब्रह्मा.पु. २९.२३

नन्तरं तदधिष्ठितब्रह्माण्डवर्तिनिखिलभूतभौतिकादीनां केवलप्रकृत्यात्मना अवस्थानं प्राकृतः प्रलयः।

अस्मिन् प्रलये “**असदेवेदमग्र आसीत्**[१]”, “**नासदासीन्नो सदासीत्**[२]”, “**तद्ध्येदं तर्ह्यव्याकृतमासीत्**[३]” इत्यादिश्रुतिर्मानम्। अपि च सूत्रकारोऽपि एवमसूत्रयत् “**कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्**[४]” इति। सूत्रार्थोऽयं भाष्यकारेण एवं स्फुटीकृतः “**कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैव उत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सह अतः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते इतीत्थं क्रममुक्तिः अनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या**[५]” इति।

अयं हि प्राकृतप्रलयो न हिरण्यगर्भादिदृष्ट्या, किन्तु अज्ञानिदृष्ट्या। तद्यथा – यदा प्रलयात् पूर्वमेव उत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो हिरण्यगर्भस्य प्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परममुक्तिः तदा तल्लोकवासिनामपि उत्पन्नब्रह्मसाक्षात्काराणां कार्यब्रह्मणा सह विदेहकैवल्यम्। एवं तल्लोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने कार्यब्रह्माधिष्ठितब्रह्माण्दान्तर्वर्तिनां चतुर्दशलोकानां तदन्तर्वर्तिनां स्थावरादीनां पृथिव्यादिभूतविकाराणां पृथिव्यादिभूतानाञ्च प्रकृतौ मायायां परिणाम्युपादाने लयो भवति। तथा चात्र भवति स्मृतिः –

**ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे।**
**परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥**[६] इति।

अपि च श्रीभगवताऽपि उक्तम् “**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्**[७]” इति। प्राकृतप्रलयविषये इदं पुराणवचनं मानरूपेण उदाजह्रुः धर्मराजाध्वरीन्द्रा वेदान्तपरिभाषायाम् –

---

[१] छा.उ. ३.१९.१
[२] ऋ.सं. १०.१२९.१
[३] बृह.उ. १.४.७
[४] ब्र.सू. ४.३.१०
[५] ब्र.सू.शां.भा. ४.३.१०
[६] ब्र.सू.शा.भा. ४.३.११ इत्यत्र उद्धृतम्
[७] भ.गी. ९.७

**द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।**
**तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि ॥**
**एषः प्राकृतिको राजन् प्रलयो यत्र लीयते॥**[१] इति।

न च ब्रह्मणो जगदुपादानत्वात् तस्मिन्नेव लयोऽस्त्विति वाच्यम्। ब्रह्मणो विवर्तोपादानत्वेन बाधरूपप्रलयस्यैव तन्निष्ठत्वात्। अर्थात् बाधरूपविनाशस्यैव ब्रह्मरूपत्वेन, प्रकृतिविनाशानन्तर-कालिकत्वाद् ब्रह्मभावस्य। अतोऽत्र लयस्य प्रकृतिनिष्ठत्वाद् अयं प्राकृतप्रलय इति उच्यते। "**अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[२]" इति उक्तेश्च।

## ४.५.२.४ आत्यन्तिकः प्रलयः —

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकः। तत्र परमात्मनि सर्वेषामविद्यातत्कार्याणां लयः। आत्यन्तिकप्रलये अविद्याया अपि लयात् परमात्मन्येव सर्वेषां लयः। भवति चात्र स्मृतिः –

**ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि।**
**प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः ॥**[३] इति।

यद्यपि प्राकृतप्रलयेऽपि ब्रह्मदृष्ट्या आत्यन्तिकः प्रलयो वर्तते, तथापि पारिभाषिको व्यवहारः सर्वमोक्षः एव आत्यन्तिकः प्रलय इति। स चैकजीववादे युगपदेव भवति। तद्यथा – जीवो नाम अविद्याप्रतिबिम्बितं चैतन्यम्। स च एकः, तदुपाधेः अविद्यायाः एकत्वादिति एकजीववादिनः। तेषां मते एकस्य तत्त्वज्ञानेन एकदैव अज्ञानतत्कार्याणां नाशाद्युगपदेव सर्वेषां मोक्षो भवति। अन्तःकरणावच्छिन्नचैतन्यं जीव इति अन्तःकरणानां जीवोपाधित्वमङ्गीकुर्वतां बहुजीववादिनां मते तु क्रमेण मोक्ष इति। तथा हि एकस्य तत्त्वज्ञानेन न कृत्स्नस्य अज्ञानस्य नाशः, अज्ञानस्य सांशत्वात् एकस्य ज्ञानेन एकांशस्य नाशेऽपि अंशान्तराणां वर्तमानत्वात्। एकैकक्रमेण सर्वेषां तत्त्वज्ञाने जाते क्रमेणैव अज्ञानतत्कार्याणां नाशात् क्रमेणैव जीवानां मोक्षः, न तु युगपत्। "**सर्व**

---

[१] भा.पु. १२.४.५,६
[२] सूत.सं. ४.२.८
[३] कू.पु. ४५.९

**कर्मचारिक्रमः (Employee No.) .............**

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

## आकस्मिक-अवकाशस्य आवेदनपत्रम्(Application of C.L)

दिनाङ्कः (Date) :......./....../२०......

१. आवेदकस्य नाम (Name) : ______________________

२. पदम्(Designation) : ______________________

३. विभागः (Department) : ______________________

४. अवकाशस्य दिनाङ्कः/दिनाङ्काः ______________________

(Date/s on which Casual Leave is required)

५. पूर्वं स्वीकृताः आकस्मिक-अवकाशाः______________________

(No. of days of Casual Leave already enjoyed)

६. अवकाशस्य कारणम् (Reason of Leave) : ______________________

आवेदकस्य हस्ताक्षरम्
(Signature of Applicant)

विभागाध्यक्षस्य/प्राचार्यस्य हस्ताक्षरम्
(Signature of Head of Department/Principal)

कुलसचिवस्य हस्ताक्षरम्
(Signature of Registrar)

कर्मचारिक्रमः (Employee No.) ..........

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

## कार्यावकाशस्य आवेदनपत्रम् (Application of D.L)

दिनाङ्कः (Date) : ....../...../२०.......

| | | |
|---|---|---|
| १. | आवेदकस्य नाम<br>(Name) | |
| २. | पदम्<br>(Designation) | |
| ३. | विभागः<br>(Department) | |
| ४. | यात्रा-प्रकारः<br>(Mode of Travel; Bus, Car, Train) | |
| ५. | यात्रारम्भस्य दिनाङ्कः समयः च<br>(Date & Time of Starting Journey) | **दिनाङ्कः -**<br>**समयः -**<br>कार्यालयसमये<br>कार्यालयसमयानन्तरम् |
| ६. | कार्यार्थम् आवश्यक-दिनाङ्कः/काः<br>(Date/s of which of Actual work is Required) | |
| ७. | यात्रा-पूर्णतायाः दिनाङ्कः समयः च<br>(Date & Time of Return Journey) | **दिनाङ्कः -**<br>**समयः -**<br>कार्यालयसमये<br>कार्यालयसमयानन्तरम् |
| ८. | आहत्य आवश्यकाः अवकाशदिवसाः(सङ्ख्यासु)<br>(Total Leaves Day/s Required) | |
| ९. | कार्यस्य प्रकारः/विवरणम्<br>(Nature of Work) | |
| १०. | आयोजक-संस्थायाः नाम सङ्केतः च<br>(Name of the University/Institute/Organization/ Department with full address) | |
| ११. | यदि परीक्षाकार्यम्, आमन्त्रण/आदेशपत्रसङ्ख्या दिनाङ्कः च<br>(In case of Examination work the invitation letter No. & Date should be attached) | |
| १२. | पूर्वं स्वीकृताः कार्यावकाशाः<br>(No. of days of Casual Leave already enjoyed) | |
| १३. | भवत: अनुपस्थित्यां रिक्तव्याख्यानं कः स्वीकरिष्यति?<br>तस्य नाम हस्ताक्षरं च<br>(Alternative teaching arrangement made with; Name & Sign. Of the person who agreed to engage classes) | |
| १४. | **केवलम् अध्यक्षस्य कृते**<br>भवत: अनुपस्थित्यां कार्यभारं कः स्वीकरिष्यति? तस्य नाम हस्ताक्षरम् च<br>(Only for H.O.D; The charge arrangement made with; Name & Sign the person) | |
| १५. | आहत्य अनुपस्थितेः दिवसाः<br>(Total days of absence) | |

विभागाध्यक्षस्य/प्राचार्यस्य हस्ताक्षरम्
(Sign. of H.O.D./Principal)

आवेदकस्य हस्ताक्षरम्
(Sign. of Applicant)

**(For office use only)**

The above duty leave may be granted on / from __/__/____ to/and __/__/____ for _____ day/s for the following reasons:________________________________________________________________

**लिपिकस्य हस्ताक्षरम् (Clerk) :**

**कार्यालय-अधिक्षकः(Office Superintendent):**

**कुलसचिवस्य हस्ताक्षरम् (Registrar) :**

**कुलपतेः हस्ताक्षरम् (Vice Chancellor) :**

**Shree Somnath Sanskrit University**
**(Estd. by Government of Gujarat)**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. SSSU/International_Conference/1506 to 1514 /2019 Date : 07.10.2019

सविधे,

Prof. Rajaram Shukla

विषयः – श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोज्यमाने अन्ताराष्ट्रिय-परिसंवादे (International Conference) तत्रभवतः मार्गदर्शनविषये ।

सादरं नतिपूर्वकमभिवादनम् ।

नमांसि ! महतः प्रमोदस्य विषयोऽयं यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ११ तः १३ फ्रेबुअरि, २०२० दिनाङ्केषु **'भाष्यपरम्परा ज्ञानप्रवाहश्च' (Tradition of Commentaries and the Dynamics of Knowledge)** इति विषये अन्ताराष्ट्रियः परिसंवादः आयोज्यमानोऽस्ति।

परिसंवादस्य सफलायोजनाय भवादृशां महानुभावानां मार्गदर्शनं परामर्शश्चानुसृत्य वयं कार्यं सम्पादयितुमिच्छामः । एतदर्थं परामर्शदातृमण्डलमेकं भवेदिति धिया मान्याः भवन्तः परामर्शकत्वेन स्वीकृतिं दातुं प्रार्थ्यन्ते।

आशासे अनुमतिप्रदानेन वयं कृतार्थीकरिष्यामहे श्रीमद्भिः ।

भावत्कः

Pandeya

**(प्रो. देवेन्द्रनाथपाण्डेयः)**
मुख्यसंयोजकः

अनुमतिपत्रम् अधोलिखितसङ्केतोपरि प्रेषयितुं शक्यते –

- प्रो. देवेन्द्रनाथ पाण्डेयः, मुख्यसंयोजकः (मो० 9328707436)
- डॉ. दीपेश विनोद कतिरा, संयोजकः (मो० 9594356857)
- डॉ. जानकीशरण आचार्यः, संयोजकः (मो० 8758817525)

श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
राजेन्द्रभुवनमार्गः, वेरावलम् – 362266 (गुजरातम्)
ई-मेल् **sssu.conference@gmail.com**

**Shree Somnath Sanskrit University**
**(Estd. by Government of Gujarat)**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. SSSU/International_Conference/1506 to 1514 /2019 Date : 07.10.2019

सविधे,

Prof. Shrinivasa Verkhedi

विषयः – श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोज्यमाने अन्ताराष्ट्रिय-परिसंवादे (International Conference) तत्रभवतः मार्गदर्शनविषये ।

सादरं नतिपूर्वकमभिवादनम् ।

नमांसि ! महतः प्रमोदस्य विषयोऽयं यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ११ तः १३ फ्रेबुअरि, २०२० दिनाङ्केषु **‘भाष्यपरम्परा ज्ञानप्रवाहश्च’ (Tradition of Commentaries and the Dynamics of Knowledge)** इति विषये अन्ताराष्ट्रियः परिसंवादः आयोज्यमानोऽस्ति।

परिसंवादस्य सफलायोजनाय भवादृशां महानुभावानां मार्गदर्शनं परामर्शश्चानुसृत्य वयं कार्यं सम्पादयितुमिच्छामः । एतदर्थं परामर्शदातृमण्डलमेकं भवेदिति धिया मान्याः भवन्तः परामर्शकत्वेन स्वीकृतिं दातुं प्रार्थ्यन्ते।

आशासे अनुमतिप्रदानेन वयं कृतार्थीकरिष्यामहे श्रीमद्भिः ।

भावत्कः

Pandeya

**(प्रो. देवेन्द्रनाथपाण्डेयः)**
मुख्यसंयोजकः

अनुमतिपत्रम् अधोलिखितसङ्केतोपरि प्रेषयितुं शक्यते –

- प्रो. देवेन्द्रनाथ पाण्डेयः, मुख्यसंयोजकः (मो० 9328707436)
- डॉ. दीपेश विनोद कतिरा, संयोजकः (मो० 9594356857)
- डॉ. जानकीशरण आचार्यः, संयोजकः (मो० 8758817525)

श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
राजेन्द्रभुवनमार्गः, वेरावलम् – 362266 (गुजरातम्)
ई-मेल् **sssu.conference@gmail.com**

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. SSSU/International_Conference/1506 to 1514 /2019 Date : 07.10.2019

सविधे,

Prof. Uma Shankar Sharma "Rishi"

विषयः – श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोज्यमाने अन्ताराष्ट्रिय-परिसंवादे (International Conference) तत्रभवतः मार्गदर्शनविषये ।

सादरं नतिपूर्वकमभिवादनम् ।

नमांसि ! महतः प्रमोदस्य विषयोऽयं यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ११ तः १३ फ्रेबुअरि, २०२० दिनाङ्केषु **'भाष्यपरम्परा ज्ञानप्रवाहश्च' (Tradition of Commentaries and the Dynamics of Knowledge)** इति विषये अन्ताराष्ट्रियः परिसंवादः आयोज्यमानोऽस्ति।

परिसंवादस्य सफलायोजनाय भवादृशां महानुभावानां मार्गदर्शनं परामर्शश्चानुसृत्य वयं कार्यं सम्पादयितुमिच्छामः । एतदर्थं परामर्शदातृमण्डलमेकं भवेदिति धिया मान्याः भवन्तः परामर्शकत्वेन स्वीकृतिं दातुं प्रार्थ्यन्ते।

आशासे अनुमतिप्रदानेन वयं कृतार्थीकरिष्यामहे श्रीमद्भिः ।

भावत्कः

Pandeya

**(प्रो. देवेन्द्रनाथपाण्डेयः)**
मुख्यसंयोजकः

अनुमतिपत्रम् अधोलिखितसङ्केतोपरि प्रेषयितुं शक्यते –

- प्रो. देवेन्द्रनाथ पाण्डेयः, मुख्यसंयोजकः (मो॰ 9328707436)
- डॉ. दीपेश विनोद कतिरा, संयोजकः (मो॰ 9594356857)
- डॉ. जानकीशरण आचार्यः, संयोजकः (मो॰ 8758817525)

श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
राजेन्द्रभुवनमार्गः, वेरावलम् – 362266 (गुजरातम्)
ई-मेल् **sssu.conference@gmail.com**